यो देवांश्च मनुष्यांश्च सर्पांश्चैकरथोऽजयत।
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
यो यानैरद्भुताकारैर्हयैर्नागैश्च संवृत"।
प्रसह्य वित्तान्यादत्त पार्थिवेभ्य" परन्तप" ॥
क्षिपत्येकेन वेगेन पञ्चवाणशतानि य"।
त ते वनगत दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
श्यामं बृहन्तं तरुण चर्मिणामुत्तमं रणे।
नकुल ते वने दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
दर्शनीयञ्च शूरञ्च माद्रीपुत्र युधिष्ठिर।
सहदेवं वने दृष्ट्वा कस्मात क्षमसि पार्थिव ॥
नकुल सहदेवञ्च दृष्ट्वा ते दुःखितावुभौ।
अदुःखार्हौ मनुष्येन्द्र कस्मान्मन्युर्न वर्द्धते ॥
द्रुपदस्य कुले जाता स्नुषा पाण्डोर्महात्मन।
धृष्टद्युम्नस्य भगिनी वीरपत्नीमनुव्रताम्।
मा वै वनगता दृष्ट्वा कस्मात् क्षमसि पार्थिव ॥
नूनञ्च तव वै नास्ति मन्युर्भरतसत्तम।
ऽ भ्रातॄं श्च माञ्चैव दृष्ट्वा न व्यथते मन ॥

न निर्मन्यु क्षत्रियोऽस्ति लोके निर्वचनं स्मृतम्।
तदद्य त्वयि पश्यामि क्षत्रिये विपरीतवत्॥
यो न दर्शयते तेज क्षत्रिय काल आगते।
सर्वभूतानि तं पार्थ सदा परिभवन्त्युत॥
तत्त्वया न क्षमा कार्या शत्रून् प्रति कथञ्चन।
तेजसैव हि ते शक्या निहन्तुं नात्र संशयः॥
तथैव च क्षमाकाले क्षत्रियो नोपशाम्यति।
अप्रियः सर्वभूतानां सोऽमुत्रेह च नश्यति॥

अष्टाविंशोऽध्यायः।

द्रौपद्युवाच।

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
प्रह्लादस्य च संवादं बलेर्वैरोचनस्य च॥
असुरेन्द्रं महाप्राज्ञं धर्माणामागतागमम्।
बलिः पप्रच्छ दैत्येन्द्रं प्रह्लादं पितरं पितुः॥

बलिरुवाच।

क्षमा स्विच्छ्रेयसी तात उताहो तेज इत्युत।
एतन्मे संशयं तात यथावद्ब्रूहि पृच्छते॥
श्रेयो यदत्र धर्मज्ञ ब्रूहि मे तदसंशयम्।
करिष्यामि हि तत्सर्वं यथावदनुशासनम्॥

तस्मै प्रोवाच तत्सर्व्वमेवं पृष्ट पितामहः ।
सर्व्वनिश्चयवित् प्राज्ञः संशयं परिपृच्छते ॥

प्रह्लाद उवाच ।

न श्रेय सततं तेजो न नित्यं श्रेयसी क्षमा ।
इति तात विजानीहि द्वयमेतदसंशयम् ॥
यो नित्यं क्षमते तात बहून् दोषान् स विन्दति ।
भृत्या परिभवन्त्येनमुदासीनास्तथारय ॥
सर्वभूतानि चाप्यस्य न नमन्ते कदाचन ।
तस्मान्नित्यं क्षमा तात पण्डितैरपनादिता ॥
अवज्ञाय हि तं भृत्या भजन्ते बहुदोषताम् ।
आदातुञ्चास्य वित्तानि प्रार्थयन्त्यल्पचेतस ॥
यान वस्त्राण्यलङ्कारान् शयनान्यासनानि च ।
भोजनान्यथ पानानि सर्व्वोपकरणानि च ॥
आददीरन्नधिकृता यथाकाममचेतस ।
प्रदिष्टानि च देयानि न दद्युर्भर्त्तृशासनात ॥
न चैनं भर्त्तृपूजाभि पूजयन्ति कथञ्चन ।
अवज्ञानं हि लोकेऽस्मिन् मरणादपि गर्हितम् ॥
क्षमिणं तादृश तात ब्रुवन्ति कटुकान्यपि ।
प्रेष्या पुत्राश्च भृत्याश्च तथोदासीनवृत्तय ॥

अथास्य दारानिच्छन्ति परिभूय क्षमावत ।
दारास्तस्य प्रवर्त्तन्ते यथाकाममचेतस ॥
तथा च नित्यमुदिता यदि नात्मनमीश्वरात् ।
दण्डमर्हन्ति दुष्यन्ति दुष्टाश्चाप्यपकुर्वते ॥
एते चान्ये च बहवो नित्यं दोषा क्षमावताम् ।
अथ वैरोचने दोषानिमान् विद्ध्यक्षमावताम् ॥
अस्थाने यदि वा स्थाने सततं रजसावृत ।
क्रुद्धो दण्डान् प्रणयति विविधान् स्वेन तेजसा ॥
मित्रै सह विरोधञ्च प्राप्नुते तेजसा वृत ।
आप्नोति द्वेष्यताञ्चैव लोकात् स्वजनतस्तथा ॥
सोऽवमानादर्थहानिमुपालम्भमनादरम् ।
सन्तापद्वेषमोहांश्च शत्रूंश्च लभते नरः ॥
क्रोधाद्दण्डान् मनुष्येषु विविधान् पुरुषो दधत् ।
भ्रश्यते शीघ्रमैश्वर्य्यात् प्राणेभ्य स्वजनादपि ॥
योऽपकर्तॄंश्च कर्त्तॄंश्च तेजसैवोपगच्छति ।
तस्मादुद्विजते लोक सर्पाद्वेश्मगतादिव ॥
तस्मादुद्विजते लोक कथं तस्य भवो भवेत् ।
अन्तरं तस्य दृष्ट्वैव लोको विकुरुते ध्रुवम् ॥
तस्मान्नात्युत्सृजेत्तेजो न च नित्यं मृदुर्भवेत् ।
काले काले तु सम्प्राप्ते मृदुस्तीक्ष्णोऽपि वा भवेत् ॥

काले मृदुर्यो भवति काले भवति दारुण ।
स वै सुखमवाप्नोति लोकेऽमुष्मिन्निहैव च ॥
क्षमाकालास्तु वक्ष्यामि शृणु मे विस्तरेण तान् ।
ये ते नित्यमसन्त्याज्या यथाप्राहुर्मनीषिण. ॥
पूर्व्वोपकारो यस्ते स्यादपराधे गरीयसि ।
उपकारेण तत्तस्य क्षन्तव्यमपराधिन ॥
अबुद्धिमाश्रितानान्तु क्षन्तव्यमपराधिनाम् ।
न हि सर्व्वत्र पाण्डित्वं सुलभं पुरुषेण वै ॥
अथ ये बुद्धिर्ज्ञं कृत्वा ब्रूयुस्ते तदबुद्धिजम् ।
पापान् स्वल्पेऽपि तान् हन्यादपराधे तथानृजून् ॥
सर्व्वस्यैकोऽपराधस्ते क्षन्तव्य प्राणिनो भवेत् ।
द्वितीये सति वध्यस्तु स्वल्पेऽप्यपकृते भवेत ॥
अजानता भवेत् कश्चिदपराध कृतो यदि ।
क्षन्तव्यमेव तस्याहु सुपरीक्ष्य परीक्षया ॥
मृदुना दारुणं हन्ति मृदुना हन्त्यदारुणम् ।
नासाध्यं मृदुना किञ्चित्तस्मात्तीव्रतर मृदु ॥
देशकालौ तु सम्प्रेक्ष्य बलाबलमथात्मन ।
नादेशकाले किञ्चित स्याद्देशकालौ प्रतीक्षताम् ॥
तथा लोकभयाच्चैव क्षन्तव्यमपराधिन ।
एत एवंविधा काला क्षमाया परिकीर्त्तिता ॥

अतोऽन्यथानुवर्त्तनम् तेजस काल उच्यते।
तदहं तेजस काल तव मन्ये नराधिप॥
धार्त्तराष्ट्रेषु लुब्धेषु सततञ्चापकारिषु॥
न हि कश्चिन्महाकालो विद्यतेऽद्य कुरून् प्रति॥
तेजसश्चागते काले तेज उत्स्रष्टुमर्हसि॥
मृदुर्भवत्यवज्ञातस्तीक्ष्णादुद्विजते जन।
काले प्राप्ते द्वयञ्चैतद्यो वेद स महीपति॥

एकोनत्रिंशोऽध्याय।

युधिष्ठिर उवाच।

क्रोधो हन्ता मनुष्याणां क्रोधो भावयिता पुन।
इति विद्धि महाप्राज्ञे क्रोधमूलौ भवाभवौ॥
यो हि संहरते क्रोध भवस्तस्य सुशोभने।
य पुन पुरुष क्रोध नित्य न सहते शुभे।
तस्याभावाय भवति क्रोध परमदारुण॥
क्रोधमूलो विनाशो हि प्रजानामिह दृश्यते।
तत कथं मादृश क्रोधमुत्सृजेल्लोकनाशनम्॥
क्रुद्ध पाप नर कुर्य्यात् क्रुद्धो हन्याद्गुरूनपि।
क्रुद्ध परुषया वाचा श्रेयसोऽप्यवमन्यते॥

वाच्यावाच्यो हि कुपितो न प्रजानाति कर्हिचित् ।
नाकार्य्यमस्ति क्रुद्धस्य नावाच्यं विद्यते तथा ॥
हिंस्यात् क्रोधादवध्यांस्तु वध्यान् सम्पूजयेत च ।
आत्मानमपि च क्रुद्धः प्रेरयेद्यमसादनम् ॥
एतान् दोषान् प्रपश्यद्भिर्जितः क्रोधो मनीषिभिः ।
इच्छद्भिः परमं श्रेयः इह चामुत्र चोत्तमम् ॥
तं क्रोधं वर्ज्जितं धीरैः कथमस्मद्विधश्चरेत् ।
एतद्द्रौपदि सन्धाय न मे मन्युः प्रवर्द्धते ॥
आत्मानञ्च परांश्चैव त्रायते महतो भयात् ।
क्रुध्यन्तमप्रतिक्रुध्यन् द्वयोरेष चिकित्सकः ॥
मूढो यदि क्लिश्यमानः क्रुद्ध्यतेऽशक्तिमान्नरः ।
बलीयसा मनुष्याणां त्यजत्यात्मानमात्मना ॥
तस्यात्मानं सन्त्यजतो लोका नश्यन्त्यनात्मनः ।
तस्माद्द्रौपद्यशक्तस्य मन्योर्नियमनं स्मृतम् ॥
विद्वांस्तथैव यः शक्तः क्लिश्यमानो न कुप्यति ।
अनाशयित्वा क्लेष्टारं परलोके च नन्दति ॥
तस्माद्बलवता चैव दुर्बलेन च नित्यदा ।
क्षन्तव्यं पुरुषेणाहुरापत्स्वपि विजानता ॥
मन्योर्हि विजयं कृष्णे प्रशंसन्तीह साधवः ।
क्षमावतो जयो नित्यं साधोरिह सतां मतम् ॥

सत्यस्यानृतत श्रेयो नृशंसाच्चानृशंसता।
तदेव बहुदोषन्तु क्रोधं साधुविवर्ज्जितम्॥
मात्स्ये मत्स्येन कस्मात् सुयोधनवधादपि।
तेजस्वीति यमाहुर्व्वै पण्डिता दीर्घदर्शिन॥
न क्रोधोऽभ्यन्तरस्तस्य भवतीति विनिश्चितम्।
यस्तु क्रोधं समुत्पन्नं प्रज्ञया प्रतिबाधते।
तेजस्विनं तं विद्वांसो मन्यन्ते तत्त्वदर्शिन॥
क्रुद्धो हि कार्य्यं सुश्रोणि न यथावत् प्रपश्यति।
न कार्य्यं न च मर्य्यादां नरः क्रुद्धोऽनुपश्यति॥
हन्त्यवध्यानपि क्रुद्धो गुरून् क्रुद्धस्तुदत्यपि।
तस्मात्तेजसि कर्त्तव्ये क्रोधो दूरे प्रतिष्ठितः॥
दाक्ष्यं ह्यमर्षं शौर्य्यञ्च शीघ्रत्वमिति तेजस।
गुणा क्रोधाभिभूतेन न शक्या प्राप्तुमञ्जसा॥
क्रोधं त्यक्त्वा तु पुरुषः सम्यक् तेजोऽभिपद्यते।
कालयुक्तं महाप्राज्ञे क्रुद्धैस्तेज सुदुःसहम्॥
क्रोधस्त्वपण्डितै शश्वत्तेज इत्यभिनिश्चितम्।
रजस्तु लोकनाशाय विहितं मानुषं प्रति॥
तस्माच्छश्वत्त्यजेत् क्रोधं पुरुषः सम्यगाचरन्।
श्रेयान् स्वधर्म्मानपगो न क्रुद्ध इति निश्चितम्।
यदि सर्व्वमबुद्धीनामतिक्रान्तमचेतसाम्।

अतिक्रमो मद्विधस्य कथ स्यात् ब्धिदनिन्दिते ॥
यदि न स्युर्मानुषेषु क्षमिणः पृथिवीसमा ।
न स्यात् सन्धिर्मनुष्याणां क्रोधमूलो हि विग्रह ॥
अभिषक्तो ह्यभिषजेदाहन्याद् गुरुणा हत ।
एव विनाशो भूतानामधर्म्म प्रथितो भवेत् ॥
आक्रुष्ट पुरुष सर्व्वं प्रत्याक्रोशेदनन्तरम् ।
प्रतिहन्याद्धतश्चैव तथा हिंस्याच्च हिंसित ॥
हन्युर्हि पितर, पुत्रा पुत्राश्चापि तथा पितॄन् ।
हन्युश्च पतयो भार्य्या पतीन् भार्य्यास्तथैव च ॥
एव सकुपिते लोके जन्म कृष्णे न विद्यते ।
प्रजाना सन्धिमूल हि जन्म विद्धि शुभानने ॥
ता क्षियेरन् प्रजा सर्व्वा क्षिप्र' द्रौपदि तादृशे ।
तस्मान्मन्युर्विनाशाय प्रजानामभवाय च ॥
यस्मात्तु लोके दृश्यन्ते क्षमिण पृथिवीसमा ।
तस्माज्जन्म च भूताना भवश्च प्रतिपद्यते ॥
क्षन्तव्य पुरुषेणेह सर्व्वापत्सु सुशोभने ।
क्षमावतो हि भूताना जन्म चैव प्रकीर्त्तितम् ॥
आक्रुष्टस्ताड़ित क्रुद्ध क्षमते यो बलीयस ।
यश्च नित्य जितक्रोधो विद्वानुत्तमपूरुष ॥
प्रभाववानपि नरस्तस्य लोका सनातना ।

योऽस्मादृग्विदुषां श्रेष्ठ देव च नन्दति ॥
अत्राप्युदाहरन्तीमा गाथा नित्यं क्षमावताम् ।
गीताः क्षमावता कृष्णे काश्यपेन महात्मना ॥
क्षमा धर्मः क्षमा यज्ञः क्षमा वेदाः क्षमा श्रुतम् ।
य एतदेवं जानाति स सर्वं क्षन्तुमर्हति ॥
क्षमा ब्रह्म क्षमा सत्यं क्षमा भूतञ्च भावि च ।
क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ॥
अतियज्ञविदां लोकान् क्षमिणः प्राप्नुवन्ति च ।
अतिब्रह्मविदां लोकानति चापि तपस्विनाम् ॥
अन्ये वै यजुषां लोकाः कर्म्मिणामपरे तथा ।
क्षमावतां ब्रह्मलोके लोकाः परमपूजिताः ॥
क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ।
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः ॥
तां क्षमां तादृशीं कृष्णे कथमस्मद्विधस्त्यजेत् ।
यस्यां ब्रह्म च सत्यञ्च यज्ञा लोकाश्च धिष्ठिताः ॥
क्षन्तव्यमेव सततं पुरुषेण विजानता ।
यदा हि क्षमते सर्वं ब्रह्म सम्पद्यते तदा ॥
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
इह सम्मानमर्हन्ति परत्र च शुभां गतिम् ॥
येषां मन्युर्मनुष्याणां क्षमयाभिहतः सदा ।

तेषां परतरे लोकास्तस्मात् क्षान्तिः परा मता ॥
इति गीताः काश्यपेन गाथा नित्यं क्षमावताम् ।
श्रुत्वा गाथाः क्षमायास्त्वं तुष्य द्रौपदि मा क्रुधः ॥
पितामहः शान्तनवः शमं सम्पूजयिष्यति ।
कृष्णश्च देवकीपुत्रः शमं सम्पूजयिष्यति ॥
आचार्यो विदुरः क्षत्ता शममेव वदिष्यतः ।
कृपश्च सञ्जयश्चैव शममेव वदिष्यतः ॥
सोमदत्तो युयुत्सुश्च द्रोणपुत्रस्तथैव च ।
पितामहश्च नो व्यासः शमं वदति नित्यशः ॥
एतैर्हि राजा नियतश्चोद्यमानः शमं प्रति ।
राज्यं दातेति मे बुद्धिर्नचेल्लोभान्नशिष्यति ॥
कालोऽयं दारुणः प्राप्तो भरतानामभूतये ।
निश्चितं मे सदैवैतत् पुरस्तादपि भाविनि ॥
सुयोधनो नार्हतीति क्षमामेवं न विन्दति ।
अर्हस्तस्याहमित्येव तस्मान्मां विन्दते क्षमा ॥
एतदात्मवतां वृत्तमेष धर्मः सनातनः ।
क्षमा चैवानृशंस्यञ्च तत् कर्त्तास्म्यहमञ्जसा ॥

त्रिशोऽध्यायः ।

द्रौपद्युवाच ।

नमो धात्रे विधात्रे च यौ मोहञ्चक्रतुस्तव ।
पितृपैतामहे वृत्ते वोढव्ये तेऽन्यथा मतिः ॥
कर्मभिश्चिन्तितो लोको गत्या गत्यां पृथग्विधः ।
तस्मात् कर्म्माणि नित्यानि लोभान्मोत्तं यियासति ॥
नेह धर्मानृशंसाभ्यां न क्षान्त्या नार्ज्जवेन च ।
पुरुषः श्रियमाप्नोति न घृणित्वेन कर्हिचित् ।
त्वाञ्चेद्व्यसनमभ्यागादिदं भारत दुःसहम् ।
यत्त्वं नार्हसि नापीमे भ्रातरस्ते महौजसः ॥
न हि तेऽध्यगमन् जातु तदानीं नाद्य भारत ।
धर्म्मात् प्रियतरं किञ्चिदपि चेज्जीवितादिह ॥
धर्म्मार्थमेव ते राज्यं धर्म्मार्थं जीवितञ्च ते ।
ब्राह्मणा गुरवश्चैव जानन्त्यपि च दैवताः ॥
भीमसेनार्ज्जुनौ चैमौ माद्रेयौ च मया सह ।
त्यजेस्त्वमिति मे बुद्धिर्न तु धर्म्मं परित्यजेः ॥
राजानं धर्म्मगोप्तारं धर्म्मो रक्षति रक्षितः ।
इति मे श्रुतमार्य्याणां त्वान्तु मन्ये न रक्षति ॥
अनन्या हि नरव्याघ्र नित्यदा धर्म्ममेव ते ।
बुद्धिः सततमन्वेति छायेव पुरुषं निजा ॥

तेषां परतरे लोकास्तस्मात् क्षान्तिः परा मता ॥
इति गीताः काश्यपेन गाथा नित्यं क्षमावताम् ।
श्रुत्वा गाथाः क्षमायास्त्वं तुष्य द्रौपदि मा क्रुधः ॥
पितामहः शान्तनवः शमं सम्पूजयिष्यति ।
कृष्णश्च देवकीपुत्रः शमं सम्पूजयिष्यति ॥
आचार्य्यो विदुरः क्षत्ता शममेव वदिष्यतः ।
कृपश्च सञ्जयश्चैव शममेव वदिष्यतः ॥
सोमदत्तो युयुत्सुश्च द्रोणपुत्रस्तथैव च ।
पितामहश्च नो व्यासः शमं वदति नित्यशः ॥
एतैर्हि राजा नियतञ्चोद्यमानः शमं प्रति ।
राज्यं दातेति मे बुद्धिर्नचेल्लोभान्नशिष्यति ॥
कालोऽयं दारुणः प्राप्तो भरतानामभूतये ।
निश्चितं मे सदैवैतत् पुरस्तादपि भाविनि ॥
सुयोधनो नार्हतीति क्षमामेवं न विन्दति ।
अर्हस्तत्राहमित्येव तस्मान्मां विन्दते क्षमा ॥
एतदात्मवतां वृत्तमेष धर्म्मः सनातनः ।
क्षमा चैवानृशंस्यञ्च तत् कर्त्तास्म्यहमञ्जसा ॥

नावमंस्था हि सुहृदान्नावरान् श्रेयसः कुतः।
अवाप्य पृथिवीं कृत्स्नां न ते शृङ्गमवर्द्धत॥
स्वाहाकारैः स्वधाभिश्च पूजाभिरपि च द्विज।
दैवतानि पितॄंश्चैव सततं पार्थ सेवसे॥
ब्राह्मणाः सर्व्वकामैस्ते सततं पार्थ तर्पिताः।
यतयो मोक्षिणश्चैव गृहस्थाश्चैव भारत॥
भुञ्जते रुक्मपात्रीभिर्य्यत्राहं परिचारिका।
आरण्यकेभ्यो लौहानि भाजनानि प्रयच्छसि
नादेयं ब्राह्मणेभ्यस्ते गृहे किञ्चन विद्यते।
यदिदं वैश्वदेवं ते शान्तये क्रियते गृहे॥
तद्दत्त्वातिथिभूतेभ्यो राजन् शिष्टेन जीवसि
इष्टय पशुबन्धाश्च काम्यनैमित्तिकाश्च ये॥
वर्त्तन्ते पाकयज्ञाश्च यज्ञकर्म्म च नित्यदा।
अस्मिन्नपि महारण्ये विजने दस्युसेविते॥
राष्ट्रादपेत्य वसतो धर्म्मस्ते नावसीदति।
अश्वमेधो राजसूय पुण्डरीकोऽथ गोसव॥
एतैरपि महायज्ञैरिष्टं ते भूरिदक्षिणैः।
राजन् परीतया बुद्ध्या विषमेऽक्षपराजये॥
राज्यं वसून्यायुधानि भ्रातॄन्माञ्चापि निर्जितः
ऋजोर्मृदोर्वदान्यस्य ह्रीमतः सत्यवादिनः॥

कथमद्यव्यसनजा बुद्धिरापतिता तव ।
अतीव मोहमायाति मनश्च परिदूयते ॥
निशम्य ते दुःखमिदमिमाञ्चापदमीदृशीम् ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥
ईश्वरस्य वशे लोकास्तिष्ठन्ते नात्मनो यथा ।
धातैव खलु भूतानां सुखदुःखे प्रियाप्रिये ॥
दधाति सर्वमीशान पुरस्तात् शुक्रमुच्चरन् ।
यथा दारुमयी योषा नरवीर समाहिता ॥
ईरयत्यङ्गमङ्गानि तथा राजन्निमा प्रजा ।
आकाश इव भूतानि व्याप्य सर्वाणि भारत ॥
ईश्वरो विदधातीह कल्याणं यच्च पापकम् ।
शकुनिस्तन्तुबद्धो वा नियतोऽयमनीश्वर ॥
ईश्वरस्य वशे तिष्ठेन्नान्येषां नात्मन प्रभु ।
मणि सूत्र इव प्रोतो नस्तत इव गोवृष ॥
धातुरादेशमन्वेति तन्मयो हि तदर्पण ।
नात्माधीनो मनुष्योऽयं कालं भजति कञ्चन
स्रोतसो मध्यमापन्न कूलाद्वृक्ष इव च्युत ॥
अज्ञो जन्तुरनीशोऽयमात्मन सुखदुःखयो
ईश्वरप्रेरितो गच्छेत् स्वर्गं नरकमेव च ॥
यथा वायोस्तृणाग्राणि वशं यान्ति बलीय

धातुरेव वशं यान्ति सर्व्वभूतानि भारत ॥
आर्य्यकर्म्मणि युञ्जान पापे वा पुनरीश्वर
व्याप्य भूतानि चरते न चायमिति लक्ष्यते
हेतुमात्रमिदं धातु शरीरं क्षेत्रसंज्ञितम् ।
येन कारयते कर्म शुभाशुभफलं विभु ॥
पश्य मायाप्रभावोऽयमीश्वरेण यथा कृत ।
यो हन्ति भूतैर्भूतानि मोहयित्वात्ममायया
अन्यथा परिदृष्टानि मुनिभिस्तत्त्वदर्शिभि ।
अन्यथा परिवर्त्तन्ते वेगा इव नभस्वत ॥
अन्यथैव हि मन्यन्ते पुरुषास्तानि तानि च
अन्यथैव प्रभुस्तानि करोति विकरोति च ।
यथा काष्ठेन वा काष्ठमश्मानञ्चाश्मना पुन
अयसा चाप्ययश्छिन्द्यान्निर्विचेष्टमचेतनम् ।
एवं स भगवान् देव स्वयम्भू प्रपितामह
हिनस्ति भूतैर्भूतानि छद्म कृत्वा युधिष्ठिर ॥
संप्रयोज्य वियोज्याय कामकारकर प्रभु ।
क्रीड़ते भगवान् भूतैर्बाल क्रीड़नकैरिव ॥
न मातृपितृवद्राजन् धाता भूतेषु वर्त्तते ।
रोषादिव प्रवृत्तोऽयं यथायमितरो जन ॥
[illegible]

अनार्य्यान् सुखिनश्चैव विह्वलामीव चिन्तया ॥
तवेमामापदं दृष्ट्वा समृद्धिञ्च सुयोधने ।
धातारं गर्हये पार्थ विषमं योऽनुपश्यति ॥
आर्य्यशास्त्रातिगे क्रूरे लुब्धे धर्म्मापचायिनि ।
धार्त्तराष्ट्रे श्रियं दत्त्वा धाता किं फलमश्नुते ॥
कर्म्म चेत् कृतमन्वेति कर्त्तारं नान्यमृच्छति ।
कर्म्मणा तेन पापेन लिप्यते नूनमीश्वरः ॥
अथ कर्म्मकृतं पापं न चेत् कर्त्तारमृच्छति ।
कारणं बलमेवेह जनान् शोचामि दुर्बलान् ॥

एकत्रिंशोऽध्यायः ।

युधिष्ठिर उवाच ।

वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि त्वया वचः ।
उक्तं तच्छ्रुतमस्माभिर्नास्तिक्यन्तु प्रभाषसे ॥
नाहं कर्म्मफलान्वेषी राजपुत्रि चराम्युत ।
ददामि देयमित्येव यजे यष्टव्यमित्युत ॥
अस्तु वात्र फलं मा वा कर्त्तव्यं पुरुषेण यत् ।
गृहे वा वसता कृष्णे यथाशक्ति करोमि तत् ॥
धर्म्मञ्चरामि सुश्रोणि न धर्म्मफलकारणात् ।
आगमाननतिक्रम्य सतां वृत्तमवेक्ष्य च ॥

धातुरेव वशं यान्ति सर्व्वभूतानि भारत ॥
आर्य्यकर्म्मणि युञ्जान पापे वा पुनरीश्वर ।
व्याप्य भूतानि चरते न चायमिति लक्ष्यते ॥
हेतुमात्रमिदं धातु शरीरं क्षेत्रसंज्ञितम् ।
येन कारयते कर्म शुभाशुभफल विभु ॥
पश्य मायाप्रभावोऽयमीश्वरेण यथा कृत ।
यो हन्ति भूतैर्भूतानि मोहयित्वात्ममायया ॥
अन्यथा परिदृष्टानि मुनिभिस्तत्त्वदर्शिभि ।
अन्यथा परिवर्त्तन्ते वेगा इव नभस्वत ॥
अन्यथैव हि मन्यन्ते पुरुषास्तानि तानि च ।
अन्यथैव प्रभुस्तानि करोति विकरोति च ॥
यथा काष्ठेन वा काष्ठमश्मानञ्चाश्मना पुन ।
अयसा चाप्ययश्छिन्द्यान्निर्विचेष्टमचेतनम् ॥
एवं स भगवान् देव स्वयम्भू प्रपितामह ।
हिनस्ति भूतैर्भूतानि छद्म कृत्वा युधिष्ठिर ॥
सम्प्रयोज्य वियोज्यायं कामकारकर प्रभु ।
क्रीड़ते भगवान् भूतैर्बाल क्रीडनकैरिव ॥
न मातृपितृवद्राजन् धाता भूतेषु वर्त्तते ।
रोषादिव प्रवृत्तोऽयं यथायमितरो जन ॥
आर्य्यान् शीलवतो दृष्ट्वा ह्रीमतो वृत्तिकर्षितान् ।

अनार्यान् सुखिनश्चैव विह्वलामीव चिन्तया ॥
तवेमामापदं दृष्ट्वा समृद्धिञ्च सुयोधने ।
धातारं गर्हये पार्थ विषमं योऽनुपश्यति ॥
आर्यशास्त्रातिगे क्रूरे लुब्धे धर्मापचायिनि ।
धार्तराष्ट्रे श्रियं दत्त्वा धाता किं फलमश्नुते ॥
कर्म चेत् कृतमन्वेति कर्तारं नान्यमृच्छति ।
कर्मणा तेन पापेन लिप्यते नूनमीश्वरः ॥
अथ कर्मकृतं पापं न चेत् कर्तारमृच्छति ।
कारणं बलमेवेह जनान् शोचामि दुर्बलान् ॥

एकत्रिंशोऽध्यायः ।

युधिष्ठिर उवाच ।

वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि त्वया वचः ।
उक्तं तच्छ्रुतमस्माभिर्नास्तिक्यन्तु प्रभाषसे ॥
नाहं कर्मफलान्वेषी राजपुत्रि चराम्युत ।
ददामि देयमित्येव यजे यष्टव्यमित्युत ॥
अस्तु वात्र फलं मा वा कर्तव्यं पुरुषेण यत् ।
गृहे वा वसता कृष्णे यथाशक्ति करोमि तत् ॥
धर्मञ्चरामि सुश्रोणि न धर्मफलकारणात् ।
आगमाननतिक्रम्य सतां वृत्तमवेक्ष्य च ॥

धर्म एव मनः कृष्णे स्वभावाच्चैव मे धृतम् ।
धर्मवाणिज्यको हीनो जघन्यो धर्मवादिनाम् ॥
न धर्मफलमाप्नोति यो धर्मं दोग्धुमिच्छति ।
यश्चैनं शङ्कते कृत्वा नास्तिक्यात् पापचेतनः ॥
अतिवादान्मदाच्चैव मा धर्ममतिशङ्किथाः ।
धर्माभिशङ्की पुरुषस्तिर्यग्गतिपरायणः ॥
धर्मो यस्याभिशङ्क्यः स्यादार्षं वा दुर्बलात्मनः
वेदान् शूद्र इवापेयात् स लोकादजरामरात् ॥
वेदाध्यायी धर्मपरः कुले जातो मनस्विनि ।
स्थविरेषु स योक्तव्यो राजभिर्धर्मचारिभिः ॥
पापीयान् स हि शूद्रेभ्यस्तस्करेभ्यो विशिष्यते
शास्त्रातिगो मन्दबुद्धिर्यो धर्ममभिशङ्कते ॥
प्रत्यक्षं हि त्वया दृष्ट ऋषिर्गच्छन् महातपाः ।
मार्कण्डेयोऽप्रमेयात्मा धर्मेण चिरजीविता ॥
व्यासो वसिष्ठो मैत्रेयो नारदो लोमशः शुकः ।
अन्ये च ऋषयः सर्वे धर्मेणैव सुचेतसः ॥
प्रत्यक्षं पश्यसि ह्येतान्
शापानुग्रहणे शक्तान्
एते हि धर्मिणो
कांक्षमाणा

अतो नार्हसि कल्याणि धातारं धर्ममेव च ।
राज्ञि मूढेन मनसा क्षेप्तुं शङ्कितुमेव च ॥
उन्मत्ता मन्यते बाल सर्व्वानागतनिश्चयान् ।
धर्माभिशङ्की नान्यस्मात् प्रमाणमधिगच्छति ॥
आत्मप्रमाण उन्नद्ध श्रेयसो ह्यवमन्यक ।
इन्द्रियप्रीतिसम्बद्ध यदिदं लोकसाक्षिकम् ।
एतावन्मन्यते बालो मोहमन्यत्र गच्छति ॥
प्रायश्चित्त न तस्यास्ति यो धर्ममभिशङ्कते ।
ध्यायन् स कृपण पापो न लोकान् प्रतिपद्यते ।
प्रमाणाद्धि निवृत्तो हि वेदशास्त्रार्थनिन्दक ॥
कामलोभानुगो मूढो नरकं प्रतिपद्यते ॥
यस्तु नित्य कृतमतिर्धर्ममेवाभिपद्यते ।
अशङ्कमान कल्याणि सोऽमुत्रानन्त्यमश्नुते ॥
आर्षं प्रमाणमुत्क्रम्य धर्म न प्रतिपालयन् ।
सर्वशास्त्रातिगो मूढ श जन्मसु न विन्दति ॥
यस्य नार्ष प्रमाण स्यान्छिष्टाचारश्च भाविनि ।
नैव तस्य परो लोको नायमस्तीति निश्चय ॥
शिष्टैराचरित धर्म कृष्ण मास्माभिशङ्किथा ।
पुराणमृषिभि प्रोक्त सर्वज्ञै सर्वदर्शिभि ॥
धर्म एव प्लवो नान्य स्वर्ग द्रौपदि गच्छताम् ।

सैव नौः सागरस्येव वणिज पारमिच्छत ॥
अफलो यदि धर्मः स्याच्चरितो धर्मचारिभि ।
अप्रतिष्ठे तमस्येतज्जगन्मज्जेदनिन्दिते ॥
निर्वाणं नाधिगच्छेयुर्जीवेयु पशुजीविकाम् ।
विद्यया नैव युञ्जेरयुर्न चार्थं केचिदाप्नुयु ॥
तपश्च ब्रह्मचर्यञ्च यज्ञ स्वाध्याय एव च ।
दानमार्ज्जवमेतानि यदि स्युरफलानि वै ॥
नाचरिष्यन् परे धर्मं परे परतरे च ये ।
विप्रलम्भोऽयमत्यन्तं यदि स्युरफला क्रिया ॥
ऋषयश्चैव देवाश्च गन्धर्वासुरराक्षसा ।
ईश्वरा कस्य हेतोस्ते चरेयुर्धर्ममादृता ॥
फलदन्त्विह विज्ञाय धातारं श्रेयसि ध्रुवम् ।
धर्मन्ते व्यचरन् कृष्णे तद्धि शर्म सनातनम् ॥
स नायमफलो धर्मो नाधर्मोऽफलवानपि ।
दृश्यन्तेऽपि हि विद्याना फलानि तपसा तथा ॥
त्वमात्मनो विजानीहि जन्म कृष्णे यथाश्रुतम् ।
वेत्थ चापि यथाजातो धृष्टद्युम्न प्रतापवान् ॥
एतावदेव पर्याप्तमुपमानं शुचिस्मिते ।
कर्मणा फलमाप्नोति धीरोऽल्पेनापि तुष्यति ॥
बहूनापि ह्यविद्वासो नैव तृप्यन्त्यबुद्धय ।

तेषां न धर्मजं किञ्चित् प्रेत्य शर्मास्ति वा पुनः ॥
कर्मणा श्रुतपुण्यानां पापानाञ्च फलोदय ।
प्रभवश्चाप्ययश्चैव देवगुह्यानि भाविनि ॥
नैतानि वेद यः कश्चिन्मुह्यन्त्यत्र प्रजा इमाः ।
अपि कल्पसहस्रेण न स श्रेयोऽधिगच्छति ॥
रक्ष्याण्येतानि देवानां गूढमाया हि देवता ।
सुतपाश्च प्रतापाश्च तपसा दग्धकिल्बिषा ॥
प्रसादैर्मानसैर्युक्ता पश्यन्त्येतानि वै द्विजाः ।
न फलादर्शनाद्धर्मः शङ्कितव्यो न देवता ॥
यष्टव्यञ्च प्रयत्नेन दातव्यञ्चानसूयता ।
कर्मणा फलमस्तीह तथैतद्धर्मशाश्वतम् ॥
ब्रह्मा प्रोवाच पुत्राणां यदृषिर्वेद काश्यपः ।
तस्मात्ते संशयः कृष्णे नीहार इव नश्यतु ॥
व्यवस्य सर्वमस्तीति नास्तिक्यं भावमुत्सृज ।
ईश्वरञ्चापि भूतानां धातारं मा च वै क्षिप ।
शिष्यस्वैनं नमस्वैनं मा तेऽभूद्बुद्धिरीदृशी ॥
यस्य प्रसादात्तद्भक्तो मर्त्यो गच्छत्यमर्त्यताम् ।
उत्तमां देवतां कृष्णे मावमंस्थाः कथञ्चन ॥

पञ्चत्यधिकशतोऽध्याय।

देवानां कथा सञ्जाता मह्यीतलं
शिविमौशीनरं साध्वेनं शिविं जिज्ञास्याम इति
एव भो इत्युक्त्वा अग्नीन्द्रावुपतिष्ठेताम्।
कपोतरूपेण तमभ्यधावदामिषार्थमिन्द्रः
रूपेण। अथ कपोतो राज्ञो
उत्सङ्गं न्यपतत्। अथ
भगवरद्यार्यं श्येनाद्भीतो भवन्तं प्राणार्थी प्रपद्यते
वसु ददातु अन्त्रवान् पार्थिवोऽस्य निष्कृतिं कुर्यात्
घोरं कपोतस्य निपातमाहु॥ अथ
नमब्रवीत् भगवरद्यार्यं श्येनाद्भीतो भवन्तं
प्रपद्ये। अङ्गैरङ्गानि प्राण्यार्थी मुनिर्भूत्वा प्राणांस्त्वां
प्रपद्ये॥ स्वाध्यायेन कर्षितं ब्रह्मचारिणं मां विद्धि
तपसा दमेन युक्तमाचार्य्यस्याप्रतिकूलभाषिणं एवं
युक्तमपापं मां विद्धि॥ गदामि वेदान् विचिनोमि
छन्द सर्वे वेदा अक्षरशो मे अधीता। न साधु दानं
श्रोत्रियस्य प्रदानं मा प्रदा श्येनाय न कपोतोऽस्मि।
अथ श्येनो राजानमब्रवीत्॥ पर्य्यायेण वसतिमां
भवेषु धर्मे जात पूर्वमस्मात् कपोतात्। त्वमाददा-
मा त्व राजन् विघ्नकर्त्ता भवेथाः॥

राजोवाच। केनेदृशी जातु मया हि दृष्टा वाग्-व्यमाना शकुनेन संस्कृता। या वै कपोतो वदति याम्ब श्येन उभौ विदित्वा कथमस्तु साधु॥ नास्य वर्षति वर्षकाले नास्य वीज रोहति काल उप्तम्। भीत प्रपन्नं यो हि ददाति शत्रवे न त्राणं लभते त्राणमिच्छन् स काले॥ जाता ह्रस्वा प्रजा प्रमीयते सदा न वै वासं पितरोऽस्य कुर्वते। भीतं प्रपन्नं यो हि ददाति शत्रवे नास्य देवा प्रतिगृह्णन्ति हव्यम्॥ मोघमन्नं विन्दति चाप्यचेता स्वर्गाल्लोकाद्भ्रश्यति शीघ्रमेव। भीतं प्रपन्नं यो हि ददाति शत्रवे सेन्द्रा देवा प्रहरन्त्यस्य वज्रम्॥ उक्षाणं पक्त्वा सह ओदनेन अस्मात् कपोतात् प्रतियं नयन्तु। यस्मिन् देशे रमसेऽतीव श्येन तत्र मांस शिवयस्ते वहन्तु॥

श्येन उवाच। नोक्षाणं राजन् प्रार्थयेय न चान्यदस्मान्मांसमधिकं या कपोतात्। देवैर्दत्त सोऽद्य ममैव भक्षस्तन्मे ददस्व शकुनानामभावात्॥

राजोवाच। उक्षाणं वेहतमनूनं नयन्तु ते पश्यन्तु पुरुषा ममैव। भयाद्भितस्य दाय समान्तिका त्वां प्रापयन्तु त्वचेन मा हिंसीः॥ त्वचे मा।

दृष्टा कपोत सोम्यो ह्यय किन्न जानामि श्येन यथाक्रोधं मा कुरुष्वेह सौम्य नाहं कथञ्चित ॥ यथा मां हि वै साधुवादैः प्रशंसेयु शिवय कर्मणा तु। यथा श्येन कुर्य्यां प्रयाधि मा यद्देस्तत करोमि ॥

श्येन उवाच। ऊरोर्दक्षिणादुत्कृत्य खपिशित तावद्राजन् यावन्मांसं कपोतेन समम्। तस्मात् साधु तात कपोत प्रशंसेयु शिवयः प्रियं स्यान्ममेति ॥ अथ स ९। १६ स्वमांसपेशीं तुलया धारयन् गुरुतर एव कपोत आसीत ॥ पुनरन्यमुच्चकर्त्त गुरुतर एव कपोत। एव सर्वं समधिकृत्य शरीरं तुलायामारोपयामास तत्तथापि गुरुतर एव कपोत आसीत ॥ अथ राजा स्वयमेव तुलामारुरोह। न च व्यलीकमासीद्राज्ञ एतद् वान्त दृष्ट्वा यात इत्युक्त्वा मालीयत श्येन अथ राजा धर्मशील कपोतं विदु शिवयस्त्वां पृच्छामि ते शकुने को नु श्येन। नानीश्वर ईदृशं जातु कुर्य्यादेत प्रश्न भगवन्ये विचक्ष्व ॥

कपोत उवाच। वैश्वानरोऽहं ज्वलनो धूमध्वजस्त्वथैव शक्रो वज्रहस्त शचीपति। साधु त्वाद

त्वामृषभं कौरवेय नौ जिज्ञासया त्वत्सकाशमुपगतौ ॥ यामेतां श्येनीं मम निष्कृयाय प्रादाङ्गयानसिनोत्कृत्य राजन् एतद्वो व्रणम् शिवं करोमि हिरण्यवर्णं रुचिरं पुण्यगन्धम् ॥ एतासां प्रजानां पालयिता यशस्वी सुरर्षीणामथ सम्मतो भव एतस्मात् पार्श्वात् पुरुषो जनिष्यति कपोतरोमेति च तस्य नाम ॥ कपोतरोमाणं शिबिनोद्भिदं पुत्रं प्राप्स्यति नृपवृषं सहननं यशोदीप्यमानं द्रष्टासि शूरमृषभं सौरथानाम् ॥

द्वादशाधिकत्रिशततमोऽध्यायः ।

यक्ष उवाच ।

किं ब्राह्मणानां देवत्वं कश्च धर्मः सतामिव ।
कश्चैषां मानुषो भावः किमेषामसतामिव ॥

युधिष्ठिर उवाच ।

स्वाध्याय एषां देवत्वं तप एषां सतामिव ।
मरणं मानुषो भावः परीवादोऽसतामिव ॥

यक्ष उवाच ।

[illegible] ज्ञियं साम किमेकं यज्ञियं यजुः ।
[illegible] वृणुते यज्ञं कां यज्ञो नातिवर्तते ॥

दद्यां कपोत सोऽयो ह्यय किन्नु जानामि श्येन। यथाक्रोशं मा कुरुष्वेह सौम्य नाहं कपोतमर्पयिष्ये कथञ्चित ॥ यथा मां हि वै साधुराहे प्रसन्ना प्रशसेयु शिवय कर्मणा तु। यथा श्येन प्रियमेव कुर्य्यां प्रशाधि मां यद्देस्तत करोमि ॥

श्येन उवाच। ऊरोर्दक्षिणादुतकृत्य स्वपिशित तावद्राजन् यावन्मास कपोतेन समम्। तथा तस्मात् साधु तात कपोत प्रशसेयु शिवय कृतञ्च प्रिय स्यान्ममेति ॥ अथ स दक्षिणादुरोरुतकृत्य स्वमांसपेशीं तुलया धारयन् गुरुतर एव कपोत आसीत ॥ पुनरन्यमुच्चकर्त्त गुरुतर एव कपोत। एव सर्व्वं समधिकृत्य शरीर तुलायामारोपयामास तत्तथापि गुरुतर एव कपोत आसीत ॥ अथ राजा स्वयमेव तुलामारुरोह। न च व्यलीकमासीद्राज्ञ एतद् वृत्तान्त दृष्ट्वा त्रात इत्युक्का मालीयत श्येन अथ राजा अब्रवीत कपोत विदु शिवयस्त्वा कपोत पृच्छामि ते शकुने को नु श्येन। नानीश्वर ईदृशं जातु कुर्य्यादेत प्रश्न भगवन्मे विचक्ष्व ॥

कपोत उवाच। वैश्वानरोऽहं ज्वलनो धूमकेतुरथैव श्येनो वज्रहस्त शचीपति। साधु ज्ञात

यक्ष। किं स्विदेकपदं धर्म्यं किं स्विदेकपदं यशः।
किं स्विदेकपदं स्वर्ग्यं किं स्विदेकपदं सुखम्॥
युधि। दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः।
सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम्॥

यक्ष उवाच।

धान्यानामुत्तमं किं स्विद्धनानां स्यात् किमुत्तमम्।
लाभानामुत्तमं किं स्यात् सुखानां स्यात् किमुत्तमम्॥
युधि। धान्यानामुत्तमं दाक्ष्यं धनानामुत्तमं श्रुतम्।
लाभानां श्रेयमारोग्यं सुखानां तुष्टिरुत्तमा॥
यक्ष। कश्च धर्मः परो लोके कश्च धर्मः सदाफलः।
किं नियम्य न शोचन्ति कैश्च सन्धिर्न जीर्यते॥
युधि। आनृशंस्यं परो धर्मस्त्रयीधर्मः सदाफलः।
मनो यम्य न शोचन्ति सन्धिः सद्भिर्न जीर्यते॥

यक्ष उवाच।

किन्नु हित्वा प्रियो भवति किन्नु हित्वा न शोचति।
किन्नु हित्वार्थवान् भवति किन्नु हित्वा सुखी भवेत्॥

युधिष्ठिर उवाच।

मानं हित्वा प्रियो भवति क्रोधं [illegible] [illegible]ति।
कामं हित्वार्थवान् भवति लोभं [illegible] भवेत्॥

युधिष्ठिर उवाच।
प्राणो हि मन्त्रिणं याति यतो हि दर्शयेत् गतः।
[illegible] इत्युक्ते तु सतो नाम्नो मानितमौनि॥
यक्ष उवाच।
इन्द्रियार्थाननुभवन् बुद्धिमान् लोकपूजितः।
सम्मतः सर्वभूतानामुच्छ्वसन् को न जीवति॥
युधिष्ठिर उवाच।
देवतातिथिभृत्यानां पितॄणामात्मनश्च यः।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति॥
यक्ष उवाच।
किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरञ्च खात्।
किंस्विच्छीघ्रतरं वायोः किंस्विद्बहुतरं तृणात्॥
युधिष्ठिर उवाच।
माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥
यक्ष उवाच।
किंस्वित् प्रवसतो मित्रं किंस्विन्मित्रं गृहे सतः।
आतुरस्य च किं मित्रं किंस्विन्मित्रं मरिष्यतः॥
युधिष्ठिर उवाच।
[illegible] प्रवसतो मित्रं भार्या मित्रं गृहे सतः।
[illegible] भिषङ्मित्रं दानं मित्रं मरिष्यतः॥

यक्ष। किं स्विदेकपदं धर्म्यं किं स्विदेकपदं यशः।
किं स्विदेकपदं स्वर्ग्यं किं स्विदेकपदं सुखम्॥
युधि। दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः।
सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम्॥

यक्ष उवाच।

धन्यानामुत्तमं किं स्विद्धनानां स्यात् किमुत्तमम्।
लाभानामुत्तमं किं स्यात् सुखानां स्यात् किमुत्तमम्॥
युधि। धन्यानामुत्तमं दाक्ष्यं धनानामुत्तमं श्रुतम्।
लाभानां श्रेयमारोग्यं सुखानां तुष्टिरुत्तमा॥
यक्ष। कश्च धर्मः परो लोके कश्च धर्मः सदाफलः।
किं नियम्य न शोचन्ति कैश्च सन्धिर्न जीर्य्यते॥
युधि। आनृशंस्यं परो धर्म्मस्त्रयीधर्म्मः सदाफलः।
मनो यम्य न शोचन्ति सन्धि सद्भिर्न जीर्य्यते॥

यक्ष उवाच।

किन्नु हित्वा प्रियो भवति किन्नु हित्वा न शोचति।
किन्नु हित्वार्थवान् भवति किन्नु हित्वा सुखी भवेत्॥

युधिष्ठिर उवाच।

मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति।
कामं हित्वार्थवान् भवति लोभं हित्वा सुखी भवेत्॥

यक्ष । किमर्थं ब्राह्मणे दानं किमर्थं नटनर्त्तके ।
किमर्थं चैव भृत्येषु किमर्थं चैव राजसु ॥
युधि । धर्मार्थं ब्राह्मणे दानं यशोर्थं नटनर्त्तके ।
भृत्येषु भरणार्थं वै भयार्थञ्चैव राजसु ॥
यक्ष । केन स्विदावृतो लोकः केन स्विन्न प्रकाशते ।
केन त्यजति मित्राणि केन स्वर्गं न गच्छति ॥
युधि । अज्ञानेनावृतो लोकस्तमसा न प्रकाशते ।
लोभात्त्यजति मित्राणि सङ्गात् स्वर्गं न गच्छति ॥
यक्ष । मृतः कथं स्यात् पुरुषः कथं राष्ट्रं मृतं भवेत् ।
श्राद्धं मृतं कथं वा स्यात् कथं यज्ञो मृतो भवेत् ॥
युधि । मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम् ।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥
यक्ष । तपः किं लक्षणं प्रोक्तं को दमश्च प्रकीर्त्तितः ।
क्षमा च का परा प्रोक्ता का च ह्रीः परिकीर्त्तिता ॥
युधि । तपः स्वधर्मवर्त्तित्वं मनसो दमनं दमः ।
क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्य्यनिवर्त्तनम् ॥
यक्ष । किं ज्ञानं प्रोच्यते राजन् कः शमश्च प्रकीर्त्तितः ।
दया च का परा प्रोक्ता किञ्चार्ज्जवमुदाहृतम् ॥
युधि । ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता ।
सर्वसुखैषित्वमार्ज्जवं समचित्तता ॥

यक्ष। कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः।
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः॥
युधि। क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः॥
यक्ष। को मोहः प्रोच्यते राजन् कश्च मानः प्रकीर्त्तितः। किमालस्यञ्च विज्ञेयं कश्च शोकः प्रकीर्त्तितः॥
युधि। मोहो हि धर्ममूढत्वं मानस्त्वात्माभिमानिता।
धर्मनिष्क्रियतालस्यं शोकस्त्वज्ञानमुच्यते॥
यक्ष। किं स्थैर्यमृषिभिः प्रोक्तं किं च धैर्य्यमुदाहृतम्।
स्नानञ्च किं परं प्रोक्तं दानञ्च किमिहोच्यते॥
युधि। स्वधर्मे स्थिरता स्थैर्यं धैर्य्यमिन्द्रियनिग्रहः।
स्नानं मनोमलत्यागो दानं वै भूतरक्षणम्॥
यक्ष। कः पण्डितः पुमान् ज्ञेयो नास्तिकः कश्च उच्यते।
को मूर्खः कश्च कामः स्यात् को मत्सर इति स्मृतः॥
युधि। धर्मज्ञः पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते।
कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः॥
यक्ष। कोऽहङ्कार इति प्रोक्तः कश्च दम्भः प्रकीर्त्तितः।
किन्तद्दैवं परं प्रोक्तं किन्तत् पैशुन्यमुच्यते॥
युधि। महाज्ञानमहङ्कारो दम्भो धर्मध्वजोच्छ्रयः।
दैवं दानफलं प्रोक्तं पैशुन्यं परदूषणम्॥

यक्ष । प्रियवचनवादी किं लभते विमृशितकार्य्य-कर कि लभते । बहुमित्रकर कि लभते धर्मे रत किं लभते कथय ॥

युधि । प्रियवचनवादी प्रियो भवति विमृशितकार्य्य-करोऽधिकं जयति । बहुमित्रकर सुख वसते यश्च धर्मरत स गतिं लभते ॥

यक्ष । को मोदते किमाश्चर्य्यं क पन्था का च वार्त्तिका । वद मे चतुर प्रश्नान् हता जीवन्तु बान्धवा. ॥

युधि । पञ्चमेऽहनि षष्ठे वा शाक पचति स्वे गृहे ।
अनृणी चाप्रवासी च स वारिचर मोदते ॥
अहन्यहनि भूतानि गच्छन्तीह यमालये ।
शेषा स्थिरत्वमिच्छन्ति किमाश्चर्य्यमत परम् ॥

तर्कोऽप्रतिष्ठ श्रुतयो विभिन्ना
नैको ऋषिर्यस्य मत प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहाया
महाजनो येन गत स पन्था ॥

अस्मिन्महामोहमये कटाहे सूर्य्याग्निना रात्रिदिने-न्धनेन ।
[illegible]र्वी [illegible]घट्ट[illegible]न भूतानि काल पचतीति वार्त्ता ॥

अष्टाधिकशततमोऽध्यायः ।

सूत उवाच ।

नीतिसारं प्रवक्ष्यामि अर्थशास्त्रादिसंश्रितम् ।
राजादिभ्यो हितं पुण्यमायुः स्वर्गादिदायकम् ॥
सद्भिः सङ्गं प्रकुर्वीत सिद्धिकामः सदा नरः ।
नासद्भिरिहलोकाय परलोकाय वा हितम् ॥
वर्जयेत् क्षुद्रसंवादमदृश्यस्य तु दर्शनम् ।
विरोधं सह मित्रेण सम्प्रीतिं शत्रुसेविना ॥
काले न रिपुणा सन्धिः काले मित्रेण विग्रहः ।
कार्य्यकारणमाश्रित्य कालं क्षिपति पण्डितः ॥
कालः पचति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः ॥
कालेन चरते वीर्य्यं काले गर्भे च वर्त्तते ।
कालो जनयते सृष्टिं पुनः कालोऽपि संहरेत् ॥
नीतिसारं सुरेन्द्राय दृष्टवांश्च बृहस्पतिः ।
सर्वज्ञो येन चेन्द्रोऽभूद्दैत्यान् हत्वाप्नुयाद्दिवम् ॥
उत्तमैः सह साङ्गत्यं पण्डितैः सह सत्कथाम् ।
अलुब्धैः सह मित्रत्वं कुर्वाणो नावसीदति ॥
परदारं परद्रव्यं परिहासं परस्त्रियाः ।
परवेश्मनि वासञ्च न कुर्वीत कदाचन ॥

परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥
स बन्धुर्यो हिते युक्तः स पिता यस्तु पोषकः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥
स भृत्यो यो विधेयस्तु तद्बीजं यत्प्ररोहति ।
सा भार्य्या या प्रियं ब्रूते स पुत्रो यस्तु जीवति ॥
स जीवति गुणा यस्य धर्म्मो यस्य स जीवति ।
गुण-धर्म्मविहीनो यो निष्फलं तस्य जीवनम् ॥
सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रियंवदा ।
सा भार्य्या या प्रियप्राणा सा भार्य्या या पतिव्रता ॥
वरं हि नरके वासो न तु दुश्चरिते गृहे ।
नरकात् क्षीयते पापं कुगृहान्न निवर्त्तते ॥

अर्थेन किं कृपणहस्तगतेन पुंसां
ज्ञानेन किं बहुशठाकुलसङ्कुलेन ।
रूपेण किं गुणपराक्रमवर्ज्जितेन
मित्रेण किं व्यसनकालपराङ्मुखेन ॥

अदृष्टपूर्व्वा बहवः सहाया
सर्व्वे पदस्थस्य भवन्ति मित्राः ।
अर्थैर्विहीनस्य पदच्युतस्य
भवत्यकाले स्वजनोऽपि शत्रुः ॥

[illegible]

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] ॥

[illegible] दुष्यन्ते
[illegible] न दीयन्ते ।
[illegible] धनं
[illegible] प्रयुज्यते ॥

न देवेभ्यो न विप्रेभ्यो बन्धुभ्यो नैव चात्मनि ।
कदर्यस्य धनं याति वह्नि-तस्कर-राजसु ॥
शाश्वतं देवपूजादि विप्रदानञ्च शाश्वतम् ।
शाश्वतं सद्गुणा विद्या सुहृन्मित्रञ्च शाश्वतम् ॥

ये बालभावान्न पठन्ति विद्यां
ये यौवनस्था ह्यधनातदारा ।
ते शोचनीया इह जीवलोके
मनुष्यरूपेण मृगाश्चरन्ति ॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्र-वक्त्रविकाराभ्यां लक्ष्यतेऽन्तर्गतं मनः ॥

त्रयोदशाधिकशततमोऽध्यायः ।

गुणवन्तं नियुञ्जीत गुणहीनं विवर्ज्जयेत् ।
पण्डितस्य गुणाः सर्व्वे मूर्खे दोषाश्च केवलाः ॥
सद्भिरासीत सततं सद्भिः कुर्व्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीञ्च नासद्भिः किञ्चिदाचरेत् ।
पण्डितैश्च विनीतैश्च धर्म्मज्ञैः सत्यवादिभिः ।
बन्धनस्थोऽपि तिष्ठेत नतु राज्ये खलैः सह ॥
सत्येन रक्ष्यते धर्म्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते पात्रं कुलं शीलेन रक्ष्यते ॥
दाता बलिर्याचनको मुरारि-
र्दानं मही विप्रमुखस्य मध्ये ।
दत्त्वा फलं बन्धनमेव लब्धं
नमोऽस्तु ते दैव यथेष्टकारिणे ॥

माता यदि भवेल्लक्ष्मीः पिता साक्षाज्जनार्दन ।
किं बुद्धिमतिपत्तिः स्यात् तदन्तं यत कृतं पुरा ॥
येन येन यथा यद्यत् पुरा कर्म्म सुनिश्चितम् ।
तत् तदेवान्तरा भुङ्क्ते स्वयमाहितमात्मन ॥
आत्मना विहितं दु खमात्मना विहितं सुखम् ।
गर्भशय्यामुपादाय भुङ्क्ते वै पौर्व्वदेहिकम् ॥

न चान्तरीक्षे न समुद्रमध्ये
न पर्व्वतानां विवरप्रदेशे ।
न मातृमूर्द्ध्नि प्रधृतस्तथाङ्के
त्यक्तुं क्षम कर्म्म कृतं नरो हि ॥
दुर्गस्त्रिकूटः परिखा समुद्रो
रक्षांसि योधा परमा च वृत्ति ।
शास्त्रञ्च नौशेयनसा समग्रं
स रावण कालवशाद्विनष्ट ॥

यस्मिन् वयसि यत्काले यद्दिवा यच्च वा निशि ।
यन्मुहूर्त्ते क्षणे वापि तत तथा न तदन्यथा ॥
गच्छन्ति चान्तरीक्षे वा प्रविशन्ति महीतले ।
धारयन्ति दिश सर्व्वा नादत्तमुपलभ्यते ॥
पुराधीता च या विद्या पुरा दत्तञ्च यद्धनम् ।
पुरा कृतानि कर्म्माणि ग्रग्रे धावन्ति धावत ॥

९म स्कन्धः।

एकविंशोऽध्याय।

वितथस्य सुतान् मन्योर्वृहतचन्नोजयस्तत।
महावीर्य्यो नरो गर्ग सङ्कृतिस्तु नरात्मज।
गुरुश्च रन्तिदेवश्च सङ्कृते पाण्डुनन्दन॥
रन्तिदेवस्य महिमा इहामुत्र च गीयते।
वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षत॥
निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदत।
व्यतीयुरष्टचत्वारिंशदहान्यपिबत किल॥
घृतपायससंयावं तोयं मातरुपस्थितं।
कृच्छ्रप्राप्तकुटुम्बस्य क्षुत्तृड्भ्यां जातवेपथो।
अतिथिर्ब्राह्मण काले भोक्तुकामस्य चागमत।
तस्मै संव्यभजत सोऽन्नमादृत्य श्रद्धयान्वित।
हरिं सर्व्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विज॥
अथान्यो भ ... विभक्तस्य महीपते।
[illegible] ... वै दृषलाय हरिं स्मरन्॥

याते शूद्रे तमभ्यागादतिथि श्वभिरावृत ।
राजन्मे दीयतामन्न सगणाय बुभुक्षवे ।
स आदृत्यावशिष्टं यद्बहुमानपुरस्कृत ।
तच्च दत्वा नमश्चक्रे श्वभ्य श्वपतये विभु ॥
पानीयमात्रमुच्छेषं तच्चैकपरितर्पण ।
पास्यत पुक्कसोऽभ्यागादपो देह्यशुभाय मे ।
तस्य तां करुणां वाच निशम्य विपुलश्रम ।
कृपया भृशसन्तप्त इदमाहामृत वच ॥

न कामयेऽह गतिमीश्वरात परा-
मष्टर्द्धियुक्तामपुनर्भव वा ।
आर्त्तिं प्रपद्येऽखिलदेहभाजा
मन्तःस्थितो येन भवन्त्यदु खा ॥
क्षुत्तृट् श्रमो गात्रपरिभ्रमश्च
दैन्य क्लम शोकविषादमोहा ।
सर्वे निवृत्ता कृपणस्य जन्तो
र्जिजीविषोर्जीवजलार्पणान्मे ।

एव प्रभाष्य पानीय म्रियमाण पिपासया ।
पुक्कसायाददाद्धीरो निसर्गकरुणो नृप ॥
तस्य त्रिभुवनाधीशा फलदा फलमिच्छतां ।
आत्मान दर्शयाञ्चक्रुर्माया विष्णुविनिर्मि

स वै तेभ्यो नमस्कृत्य निःसङ्गो विगतस्पृहः ।
वासुदेवे भगवति भक्त्या चक्रे मनः परं ॥
ईश्वरालम्बनं चित्तं कुर्व्वतोऽनन्यराधसः ।
माया गुणमयी राजन् स्वप्नवत् प्रत्यलीयत ।
तत् प्रसङ्गानुभावेन रन्तिदेवानुवर्त्तिनः ।
अभवन् योगिनः सर्व्वे नारायणपरायणाः ॥

श्रीश्रीमद्भगवद्गीता ।

द्वादशोऽध्याय ।

अर्ज्जुन उवाच ।

एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमा ॥

श्रीभगवानुवाच ।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मता ॥
ये त्वक्षरमनिर्द्देश्यमव्यक्तं पर्य्युपासते ।
सर्व्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुव ॥
सन्नियम्येन्द्रियग्रामं सर्व्वत्र समबुद्धय ।
ते प्राप्नुवन्ति मामेव सर्व्वभूतहिते रता ॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥
ये तु सर्व्वाणि कर्म्माणि मयि सन्न्यस्य मत्परा ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसां ॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्द्ध्वं न संशयः ॥
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रित ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥
श्रेयो हि ज्ञानमभ्यासात् ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरं ॥
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।

शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥
ये तु धर्म्यामृतमिदं यथोक्तं पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥

षोडशोऽध्यायः ।

श्रीभगवानुवाच ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्ज्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्द्दवं ह्रीरचापलम् ॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥
दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥
दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥
द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥

प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुरा
न शौचं नापि चाचारो न सत्यं तेषु विद्यते
असत्यमप्रतिष्ठन्त जगदाहुरनीश्वरं।
अपरस्परसम्भूतं किमन्यत् कामहैतुकं॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्म्माण क्षयाय जगतोऽहिता।
काममाश्रित्य दुष्पूर दम्भमानमदान्विता।
मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्त्तन्तेऽशुचि
चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिता।
कामोपभोगपरमा एतावदिति निश्चिता॥
आशापाशशतैर्बद्धा कामक्रोधपरायणा।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं।
इदमस्तीदमपि मे भविष्यति पुनर्धन॥
असौ मया हत शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता
अनेकचित्तविभ्रान्ता मोहजालसमावृता।
प्रसक्ता कामभोगेषु पतन्ति नरकेऽशुचौ॥

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥
अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥
एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि

षोडशोऽध्यायः ।

अर्जुन उवाच ।

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः

श्रीभगवानुवाच ।

त्रिविधा भवति श्रद्धा देहिना सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां श्रृणु ॥
सत्त्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्ध स एव स ॥
यजन्ते सात्त्विका देवान् यचरक्षांसि राजसा ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जना ॥
अशास्त्रविहित घोरं तप्यन्ते ये तपोधना ।
दम्भाहङ्कारसंयुक्ता कामरागबलान्विता ॥
कर्षयन्त शरीरस्थं भूतग्राममचेतस ।
माञ्चैवान्त शरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥
आहारस्त्वपि सर्व्वस्य त्रिविधो भवति प्रिय ।
यज्ञस्तपस्तथा दानं तेषा भेदमिम श्रृणु ॥
आयु सत्त्वबलारोग्यसुखप्रीतिविवर्द्धना । प्रिया ॥
रस्या स्निग्धा स्थिरा हृद्या आहारा सात्त्विक-
कट्वम्ललवणात्युष्णतीक्ष्णरुक्षविदाहिन ।
आहारा राजसस्येष्टा दु खशोकामयप्रदा ॥
यातयाम गतरस पूतिपर्य्युषितञ्च यत ।
उच्छिष्टमपि चामेध्य भोजन तामसप्रिय ॥

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणं।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥
देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।
श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं॥
मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतं॥
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतं॥

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतं॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतं॥
ओंतत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां॥
तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥
सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते।
प्रशस्ते कर्म्मणि तथा सच्छब्दः पार्थ युज्यते॥
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।
कर्म्म चैव तदर्थीयं सदित्येवाभिधीयते॥
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह॥

मनुसंहिता ।

प्रथमोऽध्याय ।

ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ।
ईश्वरः सर्व्वभूतानां धर्म्मकोषस्य गुप्तये ॥
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥
ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः ।
कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः ॥
आचारः परमो धर्म्मः श्रुत्युक्तः स्मार्त्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ॥
आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।
आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत् ॥

द्वितीयोऽध्याय ।

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्म्मस्तन्निबोधत ॥
वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥
सर्व्वन्तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ।
श्रुतिप्रामाण्यतो विद्वान् स्वधर्म्मे निविशेत वै ॥

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥
श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥
योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्य्यो नास्तिको वेदनिन्दकः ॥
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥
पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ।
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्वशः ॥
पूजितं ह्यशनं नित्यं बलमूर्ज्जञ्च यच्छति ।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम् ॥
अनारोग्यमनायुष्यमस्वर्ग्यञ्चातिभोजनम् ।
अपुण्यं लोकविद्विष्टं तस्मात्तत् परिवर्ज्जयेत् ॥
एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः ।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते ॥
जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः ।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ॥
इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
संयमे यत्नमातिष्ठेद्विद्वान् यन्तेव वाजिनाम् ॥

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥
यश्चैतान् प्राप्नुयात् सर्वान् यश्च तान् केवलांस्त्यजेत्
प्रापणात् सर्वकामानां परित्यागो विशिष्यते ॥
वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ॥
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥
यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः ।
तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु ॥
धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥
विद्ययैव समं कामं मर्त्तव्यं ब्रह्मवादिना ।
आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् ॥
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च ।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ।
शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् ।
शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत् ।
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशो बलम् ।

ब्राह्मणं कुशलं पृच्छेत क्षत्त्रबन्धुमनामयम्।
वैश्य क्षेम समागम्य शूद्रमारोग्यमेव च॥
परपत्नी तु या स्त्री स्यादसम्बन्धा च योनित।
ता ब्रूयाद्भवतीत्येव सुभगे भगिनीति च॥
मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून्।
असावहमिति ब्रूयात प्रत्युत्थाय यवीयस॥
मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा।
संपूज्या गुरुपत्नीवत समास्ता गुरुभार्य्यया॥
उपाध्यायान् दशाचार्य्य आचार्य्याणां शत पिता।
सहस्रन्तु पितॄन्माता गौरवेणातिरिच्यते॥
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मद पिता।
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम्॥
अज्ञो भवति वै बाल पिता भवति मन्त्रद।
अज्ञं हि बालमित्याहु पितेत्येव तु मन्त्रदम्॥
न हायनैर्न पलितैर्न वित्तेन न बन्धुभि।
ऋषयश्चक्रिरे धर्मं योऽनूचान स नो महान्॥
विप्राणां ज्ञानतो ज्यैष्ठ्य क्षत्रियाणान्तु वीर्य्यत।
वैश्यानां धान्यधनत शूद्राणामेव जन्मत॥
न तेन वृद्धो भवति येनास्य पलित शिर।
यो वै युवाप्यधीयानस्त देवा स्थविर विदु॥

नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्मधी ।
ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत ॥
सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव ।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा ॥
सुखं ह्यवमतः शेते सुखञ्च प्रतिबुध्यते ।
सुखं चरति लोकेऽस्मिन्नवमन्ता विनश्यति ॥
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥
मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने ।
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् ॥
आचार्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः ।
माता पृथिव्या मूर्त्तिस्तु भ्राता स्वो मूर्त्तिरात्मनः ॥
आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्त्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ॥
यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्त्तुं वर्षशतैरपि ॥
तयोर्नित्यं प्रियं कुर्य्यादाचार्यस्य च सर्वदा ।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥
तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ।
न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् ॥

इम लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ।
गुरुशुश्रूषया त्वेव ब्रह्मलोकं समश्नुते ॥
सर्व्वे तस्यादृता धर्म्मा यस्यैते त्रय आदृता ।
अनादृतास्तु यस्यैते सर्व्वास्तस्याफला क्रिया ॥
यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् ।
तेष्वेव नित्यं शुश्रूषा कुर्य्यात् प्रियहिते रत ॥
श्रद्दधान शुभा विद्यामाददीतावरादपि ।
अन्त्यादपि परं धर्म्मं स्त्रीरत्नं दुष्कुलादपि ॥
विषादप्यमृतं ग्राह्य बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ॥
अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरो ॥
नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत ।
ब्राह्मणे चाननूचाने काङ्क्षन् गतिमनुत्तमाम् ॥
यदि त्वात्यन्तिकं वास रोचयेत गुरो कुले ।
युक्त परिचरेदेनमाशरीरविमोक्षणात ॥
न पूर्व्वं गुरवे किञ्चिदुपकुर्व्वीत धर्म्मवित ।
स्नास्यस्तु गुरुणाज्ञप्त शक्त्या गुर्व्वर्थमाहरेत ॥

तृतीयोऽध्यायः ।

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि ।
उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम् ॥
असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने ॥
हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः ।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥
अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा ।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत् ॥
पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥
यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्व्वास्तत्राफलाः क्रियाः ॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्व्वदा ॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च

यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ॥
अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥
यथा वायुं समाश्रित्य वर्त्तन्ते सर्वजन्तवः ।
तथा गृहस्थमाश्रित्य वर्त्तन्ते सर्व आश्रमाः ॥
यत् पुण्यफलमाप्नोति गां दत्त्वा विधिवद्गुरो ।
तत् पुण्यफलमाप्नोति भिक्षां दत्त्वा द्विजो गृही ॥
संप्राप्ताय त्वतिथये प्रदद्यादासनोदके ।
अन्नञ्चैव यथाशक्ति सत्कृत्य विधिपूर्व्वकम् ॥
तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥
न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् ।
धन्यं यशस्यमायुष्यं स्वर्ग्यञ्चातिथिपूजनम् ॥
देवानृषीन्मनुष्यांश्च पितॄन् गृह्याश्च देवताः ।
पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् ॥
अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् ।
यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते ॥

चतुर्थोऽध्याय ।

...ायुषो भागमुषित्वाद्यं गुरौ द्विज ।
...मायुषो भार्यां कृतदारो गृहे वसेत् ॥
...णैव भूतानामल्पद्रोहेण वा पुन ।
...स्तां समास्थाय विप्रो जीवेदनापदि ॥
...मात्रप्रसिद्ध्यर्थं स्वै कर्मभिरगर्हितै ।
... शरीरस्य कुर्वीत धनसञ्चयम् ॥
...ताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
...ताभ्यामपि वा न श्ववृत्त्या कदाचन ॥
...ञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
...याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
...तं तु वाणिज्यं तेन चैवापि जीव्यते ।
...श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥
...दा वर्त्तेत द्विजैतो ह्यदञ्जन ।
...समग्रो गृही जीवेद्ब्राह्मणार्थेऽधिकान् ॥
... परमान्नाय भ्रातादौ पंचतो भवेत् ।
...त्वं हि मुख्यं दुष्करं विवर्जयेत् ॥
...दा हि पुत्र शान्तं सर्वदिवस्तृति ।
...दा हित्वापि विद्यान्दद्यात् दापयेत् ॥
...।
...।

अतिथि देवता भावनाद्य सर्वदा ।
नूनं विधत्ता यथागतं न चारयेत् ॥
साक्षी । पश्यन् दृष्टेन यथोर्थी चानुतिष्ठेत ।
चानक्षेत्रोण गतप्रमाद् देवतार्थमेव च ॥
शृङ्गारायतार्थं शता ब्राह्मणेन समाश्रित ।
मूर्धा सदा कण्डूयेदत्मनो चादत्तो शिरः ॥
न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ।
न वासोभि सहाजस्र नाविज्ञाते जलाशये ॥
नात्मानमवमन्येत पूर्वाभिरसमृद्धिभि ।
आमृत्यो श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ॥
सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।
प्रियञ्च नानृतं ब्रूयादेष धर्म्म सनातन ॥
भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् ।
शुष्कवैरं विवादञ्च न कुर्य्यात् केनचित् सह ॥
वेदाभ्यासेन सततं शौचेन तपसैव च ।
अद्रोहेण च भूतानां जातिं स्मरति पौर्व्विकीम् ॥
अभिवादयेद् वृद्धांश्च दद्याच्चैवासनं स्वकम् ।
कृताञ्जलिरुपासीत गच्छत पृष्ठतोऽन्वियात् ॥
श्रुतिस्मृत्युदितं सम्यङ्निबद्धं स्वेषु कर्म्मसु ।
धर्म्ममूलं निषेवेत सदाचारमतन्द्रित ॥

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥
दुराचारो हि पुरुषो लोके भवति निन्दितः ।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च ॥
सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥
सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः ॥
यत् कर्म कुर्वतोऽस्य स्यात् परितोषोऽन्तरात्मनः ।
तत् प्रयत्नेन कुर्वीत विपरीतन्तु वर्जयेत् ॥
आचार्यञ्च प्रवक्तारं पितरं मातरं गुरुम् ।
न हिंस्याद्ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विनः ॥
नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम् ।
द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत् ॥
परस्य दण्डं नोद्यच्छेत् क्रुद्धो नैव निपातयेत् ।
अन्यत्र पुत्राच्छिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ ॥
ब्राह्मणायावगुर्यैव द्विजातिर्वधकाम्यया ।
शतं वर्षाणि तामिस्रे नरके परिवर्तते ॥
ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम् ।
एकविंशतिमाजातीः पापयोनिषु जायते ॥

नाधर्म्मश्चरितो लोके सद्यः फलति गौरिव ।
शनैरावर्त्तमानस्तु कर्त्तुर्मूलानि कृन्तति ॥
यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु ।
न त्वेव तु कृतोऽधर्म्मः कर्त्तुर्भवति निष्फलः ॥
अधर्म्मेणैधते तावत्ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥
सत्यधर्म्मार्य्यवृत्तेषु शौचे चैव रमेत सदा ।
शिष्यांश्च शिष्याद्धर्म्मेण वाग्बाहूदरसंयतः ॥
परित्यजेदर्थकामौ यौ स्यातां धर्म्मवर्जितौ ।
धर्म्मञ्चाप्यसुखोदर्कं लोकविक्रुष्टमेव च ॥
न पाणिपादचपलो न नेत्रचपलोऽनृजुः ।
न स्याद्वाक्चपलश्चैव न परद्रोहकर्म्मधीः ॥
येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यति ॥
ऋत्विक्पुरोहिताचार्य्यैर्मातुलातिथिसंश्रितैः ।
बालवृद्धातुरैर्वैद्यैर्ज्ञातिसम्बन्धिबान्धवैः ॥
मातापितृभ्यां यामीभिर्भ्रात्रा पुत्रेण भार्य्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥
एतैर्विवादान् सन्त्यज्य सर्व्वपापैः प्रमुच्यते ।
एभिर्जितैश्च जयति सर्व्वान् लोकानिमान् गृही ॥

आचार्य्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः।
अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः॥
जामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः।
सम्बन्धिनो ह्यपां लोके पृथिव्यां मातृमातुलौ॥
आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः।
भ्राता ज्येष्ठः समः पित्रा भार्य्या पुत्रः स्वका तनुः॥
छाया स्वो दासवर्गश्च दुहिता कृपणं परम्।
तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा॥
दानधर्म्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम्।
परितुष्टेन भावेन पात्रमासाद्य शक्तितः॥
यत्किञ्चिदपि दातव्यं याचितेनानसूयया।
उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्व्वतः॥
सर्व्वेषामेव दानानां ब्रह्मदानं विशिष्यते।
वार्य्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम्॥
येन येन तु भावेन यद्यद्दानं प्रयच्छति।
तत्तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः॥
योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव च।
तावुभौ गच्छतः स्वर्गं नरकन्तु विपर्य्यये॥
धर्म्मं शनैः सञ्चिनुयाद्वल्मीकमिव पुत्तिकाः।
परलोकसहायार्थं सर्व्वभूतान्यपीडयन्।

नामुत्र हि सहायार्थं पिता माता च तिष्ठत ।
न पुत्रदारं न ज्ञातिर्धर्म्मस्तिष्ठति केवल ॥
एक प्रजायते जन्तुरेक एव प्रलीयते ।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥
मृतं शरीरमुत्सृज्य काष्ठलोष्ट्रसम क्षितौ ।
विमुखा बान्धवा यान्ति धर्म्मस्तमनुगच्छति ॥
तस्माद्धर्म्मं सहायार्थं नित्यं सञ्चिनुयाच्छनै
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥
एकाकी चिन्तयेन्नित्य विविक्ते हितमात्मन
एकाकी चिन्तयानो हि पर ... ोऽ ... ि

पञ्चमोऽध्याय ।

अनभ्यासेन वेदानामाचारस्य च वर्ज्जना
आलस्यादन्नदोषाच्च मृत्युर्विमान् ... ।
यावन्ति पशुरोमाणि तावतकृत्वो ह म...
वृथा पशुघ्न प्राप्नोति प्रेत्य जन्मनि ... नि
यो बन्धनवधक्लेशान् प्राणिना न चिकीर्षे
स सर्व्वस्य हितप्रेप्सु, सुखमत्यन्तमश्नुते ॥
यद्ध्यायति यतकुरुते धृत बध्नाति यत्र च
तदवाप्नोत्ययत्नेन यो हिनस्ति ...

नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत्॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम्।
प्रसमीक्ष्य निवर्त्तेत सर्व्वमांसस्य भक्षणात्॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते॥
अनुमन्ता विशसिता निहन्ता क्रयविक्रयी।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम्॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः।
न तत्फलमवाप्नोति यन्मांसपरिवर्ज्जनात्॥
मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम्।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला॥
क्षान्त्या शुध्यन्ति विद्वांसो दानेनाकार्य्यकारिणः।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः॥
मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः॥

नामुत्र हि सहायार्थं पिता माता च तिष्ठतः ।
न पुत्रदारं न ज्ञातिर्धर्मस्तिष्ठति केवलः ॥
एकः प्रजायते जन्तुरेक एव प्रलीयते ।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥
तस्माद्धर्मं सहायार्थं नित्यं सञ्चिनुयाच्छनैः ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥
एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः ।
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति ॥

पञ्चमोऽध्यायः ।

अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथा पशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
यो बन्धनवधक्लेशान् प्राणिनां न चिकीर्षति ।
स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते ॥
यद्ध्यायति यत्कुरुते धृतिं बध्नाति यत्र च ।
तदवाप्नोत्ययत्नेन यो हिनस्ति न किञ्चन ॥

नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्ज्जयेत् ॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्त्तेत सर्वमांसस्य भक्षणात् ॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ॥
अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः ।
न तत्फलमवाप्नोति यन्मांसपरिवर्ज्जनात् ॥
मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥
क्षान्त्या शुध्यन्ति विद्वांसो दानेनाकार्य्यकारिणः ।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः ॥
मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुद्ध्यति ।
रजसा स्त्री मनोदुष्टा सन्न्यासेन द्विजोत्तमः ॥

अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति॥
बालया वा युवत्या वा वृद्धया वापि योषिता।
न स्वातन्त्र्येण कर्तव्यं किञ्चित् कार्य्यं गृहेष्वपि॥
बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने।
पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम्॥
पित्रा भर्त्रा सुतैर्वापि नेच्छेद्विरहमात्मनः।
एषां हि विरहेण स्त्री गर्ह्ये कुर्य्यादुभे कुले॥
सदा प्रहृष्टया भाव्यं गृहकार्य्येषु दक्षया।
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया॥
यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः।
तं शुश्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत्॥
मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम्।
विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः।
उपचर्य्यः स्त्रिया साध्व्या सततं देववत् पतिः।
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते।
[illegible]।
[illegible]।

कामन्तु क्षपयेद्देहं पुष्पमूलफलै शुभै ।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु ॥
आसीतामरणात क्षान्ता नियता ब्रह्मचारिणी ।
यो धर्म्म एकपत्नीना काङ्क्षन्ती तमनुत्तमम् ॥
पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्त्तृलोकानाप्नोति सद्भि साध्वीति चोच्यते ॥

षष्ठाध्याय ।

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मन ।
अपत्यस्यैव चापत्य तदारण्यं समाश्रयेत ॥
सन्त्यज्य ग्राम्यमाहारं सर्व्वञ्चैव परिच्छदम् ।
पुत्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा ॥
ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत ।
अनपाकृत्य मोक्षन्तु सेवमानो व्रजत्यध ॥
अधीत्य विधिवद्वेदान् पुत्राश्चोत्पाद्य धर्म्मत ।
दृष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥
अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यध ॥
एकएव चरेन्नित्य सिद्ध्यर्थमसहायवान ।
सिद्धिमेकस्य सम्पश्यन्न जहाति न हीयते ॥

कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मन पूतं समाचरेत् ॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वश ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥
अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥
अवेक्षेत गतीर्नॄणां कर्मदोषसमुद्भवाः ।
निरये चैव पतनं यातनाश्च यमक्षये ॥

विप्रयोग प्रियैश्चैव संयोगञ्च तथाप्रियै ।
जरया चाभिभवन व्याधिभिश्चोपपीडनम् ॥
देहादुत्क्रमणञ्चास्मात् पुनर्गर्भे च सम्भवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मन ॥
अधर्मप्रभवञ्चैव दु खयोग शरीरिणाम् ।
धर्मार्थप्रभवञ्चैव सुखसयोगमक्षयम् ॥
सूक्ष्मताञ्चान्ववेक्षेत योगेन परमात्मन ।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥
दूषितोऽपि चरेद्धर्म यत्र तत्राश्रमे रत ।
सम सर्व्वेषु भूतेषु न लिङ्ग धर्मकारणम् ॥
सम्यग्दर्शनसम्पन्न कर्मभिर्न निबध्यते ।
दर्शनेन विहीनस्तु ससार प्रतिपद्यते ॥
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभि ।
तपसश्चरणैश्चोग्रै साधयन्तीह तत्पदम् ॥
अस्थिस्थूण स्नायुयुत मांसशोणितलेपनम् ।
चर्मावनद्ध दुर्गन्धि पूर्ण मूत्रपुरीषयो ॥
जराशोकसमाविष्ट रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिम त्यजेत् ॥
नदीकूल यथा वृक्षो वृक्ष वा शकुनिर्यथा ।
तथा त्यजन्निमन्देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥

यदा भावेन भवति सर्व्वभावेषु निःस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥
सर्व्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्त्ति हि
यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम्
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम् ।
चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः ।
दशलक्षणको धर्म्मः सेवितव्यः प्रयत्नतः ॥
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम् ॥
दश लक्षणानि धर्म्मस्य ये विप्राः समधीयते ।
अधीत्य चानुवर्त्तन्ते ते यान्ति परमां गतिम् ॥
संन्यस्य सर्व्वकर्म्माणि कर्म्मदोषानपानुदन् ।
नियतो वेदमभ्यस्य पुत्रैश्वर्य्ये सुखं वसेत् ॥
एवं संन्यस्य कर्म्माणि स्वकार्य्यपरमोऽस्पृहः ।
संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ॥

सप्तमाध्यायः ।

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्व्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणम् ॥

अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥
दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्बुधाः ॥
दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः ।
धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम् ॥
वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ॥
संग्रामेष्वनिवर्त्तित्वं प्रजानाञ्चैव पालनम् ।
शुश्रूषा ब्राह्मणानाञ्च राज्ञां श्रेयस्करं परम् ॥
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः ।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥
न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून् ।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥
न च हन्यात् स्थलारूढं न क्लीवं न कृताञ्जलिम् ।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ॥
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् ।
नायुध्यमानं पश्यन्तं न परेण समागतम् ॥

नायुधव्यसनमाप्तं नार्त्तं नातिपरिक्षतम्।
न भीतं न पराङ्वृत्तं सतां धर्म्ममनुस्मरन्॥
यस्तु भीतं पराङ्वृत्तं सङ्ग्रामे हन्यते परैः।
भर्त्तुर्यद्दुष्कृतं किञ्चित् तत् सर्व्वं प्रतिपद्यते॥
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः।
नित्यं संवृतसंवार्य्यो नित्यं छिद्रानुसार्य्यरेः॥
नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत्।
तस्मात् सर्व्वाणि भूतानि दण्डेनैव प्रसाधयेत्॥
वकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्॥
एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः।
तानानयेद्वशं सर्व्वान् सामादिभिरुपक्रमैः॥

षष्टमोऽध्यायः।

एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्व्वमन्यद्धि गच्छति॥
साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्य्यसंसदि।
[illegible] प्रेत्य स्वर्गाच्च हीयते॥
[illegible]हि यो दाता स पूज्यः सततं नृप।
सम हि वर्द्धते तस्य सदैवाभयदक्षिणम्॥

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः ।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः ॥
यदधीते यद्यजते यद्ददाति यदर्चति ।
तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात् ॥
रक्षन् धर्मेण भूतानि राजा वध्यांश्च घातयन् ।
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥
योऽरक्षन् बलिमादत्ते करं शुल्कञ्च पार्थिवः ।
प्रतिभागञ्च दण्डञ्च स सद्यो नरकं व्रजेत् ॥
यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक् ।
न साहसिकदण्डघ्नौ स राजा शक्रलोकभाक् ॥
अहन्यहन्यवेक्षेत कर्मान्तान् वाहनानि च ।
आयव्ययौ च नियतावाकरान् कोषमेव च ॥

नवमोऽध्यायः ।

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥
यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥
ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ॥

विंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥
पितेव पालयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयसः।
पुत्रवच्चापि वर्त्तेरन् ज्येष्ठे भ्रातरि धर्मतः॥
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः।
ज्येष्ठः कुलं वर्द्धयति विनाशयति वा पुनः॥
यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः।
अज्येष्ठवृत्तिर्यस्तु स्यात् स सम्पूज्यस्तु बन्धुवत्॥
एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया।
पृथग्विवर्द्धते धर्म्मस्तस्माद्धर्म्मात् पृथक् क्रिया॥
जेष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम्।
येऽन्ये जेष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम्॥
सर्वेषां धनजातानामाददीताग्र्यमग्रजः।
यच्च सातिशयं किञ्चिद्दशतश्चाप्नुयाद्वरम्॥
उद्धारो न दशस्वस्ति सम्पन्नानां स्वकर्मसु।
यत् किञ्चिदेव देयन्तु ज्यायसे मानवर्द्धनम्॥
एवं समुद्धृतोद्धारे समानांशान् प्रकल्पयेत्।
उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना॥
एकाधिकं हरेज्जेष्ठः पुत्रोऽध्यर्द्धं ततोऽनुजः।
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः॥

श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति ।
हूयमानश्च यज्ञेषु भूय एवाभिवर्धते ॥
एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु ।
सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ॥
नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते ।
ब्रह्म क्षत्रञ्च सम्पृक्तमिह चामुत्र वर्धते ॥

दशमोऽध्यायः ।

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः ।
प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः ॥
सर्वेषां ब्राह्मणो विद्याद्वृत्त्युपायान् यथाविधि ।
प्रब्रूयादितरेभ्यश्च स्वयञ्चैव तथा भवेत् ॥
वैशेष्यात् प्रकृतिश्रैष्ठ्यान्नियमस्य च धारणात् ।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ॥
ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट् कर्माणि यथाक्रमम् ॥
अध्यापनमध्ययनं यजनं याजनन्तथा ।
दानं प्रतिग्रहश्चैव षट् कर्माण्यग्रजन्मनः ॥
[illegible]
[illegible]

सर्व्वत प्रतिगृह्णीयद्ब्राह्मणस्त्वनय गत ।
पवित्र' दुष्यतीत्येतत् धर्म्मतो नोपपद्यते ॥
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात ।
दोषो भवति विप्राणा ज्वलनाम्बुसमाहिते ॥
जीवितात्ययमापन्नो योऽन्नमत्ति यतस्तत ।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥

एकादशोऽध्याय ।

प्रभु परजने दाता स्वजने दु खजीविनि ।
मध्यापातो विषास्वाद स धर्म्मप्रतिरूपक ॥
भृत्यानामुपरोधेन यत करोत्यौर्द्ध्वदेहिकम् ।
तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च ॥
देवस्वं ब्राह्मणस्व' वा लोभेनोपहिनस्ति य ।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥
ब्राह्मण सम्भवेनैव देवानामपि दैवतम् ।
प्रमाणञ्चैव लोकस्य ब्रह्मावैव हि कारणम् ॥
सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिवेत ॥
ख्यापनेनानुतापेन तपसाध्ययनेन च ।
[illegible]

यथा यथा नरोऽधर्मं स्वयं कृत्वानुभाषते ।
तथा तथा त्वचेवाहिस्तेनाधर्मेण मुच्यते ॥
यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति ।
तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते ॥
कृत्वा पापं हि सन्तप्य तस्मात् पापात् प्रमुच्यते ।
नैव कुर्य्यात् पुनरिति निवृत्त्या पूयते तु सः ॥
एवं सञ्चिन्त्य मनसा प्रेत्य कर्मफलोदयम् ।
मनोवाङ्मूर्त्तिभिर्नित्यं शुभं कर्म समाचरेत् ॥
अज्ञानाद्यदि वा ज्ञानात् कृत्वा कर्म विगर्हितम् ।
तस्माद्विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत् ॥
औषधान्यगदो विद्या दैवी च विविधा स्थितिः ।
तपसैव प्रसिद्ध्यन्ति तपस्तेषां हि साधनम् ॥
यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम् ।
सर्व्वन्तु तपसा साध्यं तपो हि दुरतिक्रमम् ॥
महापातकिनश्चैव शेषाश्चाकार्य्यकारिणः ।
तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः ॥
कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च ।
स्थावराणि च भूतानि दिवं यान्ति तपोबलात् ॥
यत् किञ्चिदेनः कुर्व्वन्ति मनोवाङ्मूर्त्तिभिर्जनाः ।
तत् सर्व्वं निर्द्दहन्त्याशु तपसैव तपोधनाः

इत्येतत्तमसो देवा महाभाग्य प्रचचते।
सर्व्वस्यास्य प्रपश्यन्तस्तमस पुराणमुत्तमम्॥
यथैधस्तेजसा वह्नि प्राप्तं निर्द्दहति क्षणात्।
तथा ज्ञानाग्निना पाप सर्व्वं दहति वेदवित्॥

द्वादशोऽध्याय।

सत्त्वं ज्ञानं तमोऽज्ञान रागद्वेषौ रज स्मृतं।
एतद्व्याप्तिमदेतेषां सर्व्वभूताश्रित वपु॥
तत्र यत् प्रीतिसंयुक्तं किञ्चिदात्मनि लक्षयेत्।
प्रशान्तमिव शुद्धाभं सत्त्व तदुपधारयेत्॥
यत्तु दु खसमायुक्तमप्रीतिकरमात्मन।
तद्रजोऽप्रतिघं विद्यात् सततं हारि देहिनाम्॥
यत्तु स्यान्मोहसंयुक्तमव्यक्तं विषयात्मकं।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत॥
त्रयाणामपि चैतेषां गुणानां य फलोदय।
अग्र्यो मध्यो जघन्यश्च त प्रवक्ष्याम्यशेषत॥
वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रह।
धर्म्मक्रियात्मचिन्ता च सात्त्विक गुणलक्षणम्॥
आरम्भरुचिताऽधैर्य्यमसत्कार्य्यपरिग्रह।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम्॥

लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥
त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम् ।
इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ॥
यत् कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति ।
तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ॥
येनास्मिन् कर्मणा लोके ख्यातिमिच्छति पुष्कलाम् ।
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम् ॥
यत् सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन् ।
येन तुष्यति चात्मास्य तत् सत्त्वगुणलक्षणम् ॥
तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते ।
सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरम् ॥
देवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसाः ।
तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥
इन्द्रियाणां प्रसङ्गेन धर्मस्यासेवनेन च ।
पापान् संयान्ति संसारानविद्वांसो नराधमाः ॥
यथा यथा निषेवन्ते विषयान् विषयात्मकाः ।
तथा तथा कुशलता तेषां तेषूपजायते ॥
तेऽभ्यासात्पापकर्मणामिन्द्रियाणां च सेवनात् ।
[illegible] दुर्गतिं च निन्दितां [illegible] ॥

सर्व्वभूतेषु चात्मानं सर्व्वभूतानि चात्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥
यथोक्तान्यपि कर्म्माणि परिहाय द्विजोत्तम ।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥
वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥
अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥
तपो विद्या च विप्रस्य निःश्रेयसकरं परम् ।
तपसा किल्बिषं हन्ति विद्ययाऽमृतमश्नुते ॥

बृहस्पतिसंहिता ।



अथ बृहस्पति प्रति इन्द्रप्रश्न ।

इष्ट्वा क्रतुशत राजा समाप्तवरदक्षिणम् ।
भगवन्त गुरु श्रेष्ठ पर्यपृच्छद्बृहस्पतिम् ॥
भगवन् केन दानेन सर्वत सुखमेधते ।
यदक्षय महार्घञ्च तन्मे ब्रूहि महत्तम ॥
एवमिन्द्रेण पृष्टोऽसौ देवदेवपुरोहित ।
वाचस्पतिर्महाप्राज्ञो बृहस्पतिरुवाच ह ॥
सुवर्णदानं भूदान गोदानञ्चैव वासव ।
एतत्प्रयच्छमानस्तु सर्व्वपापै प्रमुच्यते ॥
सुवर्ण रजतं वस्त्र मणि रत्नञ्च वासव ।
सर्व्वमेव भवेद्दत्त वसुधां य प्रयच्छति ॥
फालकृष्टां महीं दत्वा सबीजां शस्यशालिनीम् ।
यावत्सूर्यकरा लोके तावत स्वर्गे महीयते ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
श्वविष्ठायां कृमिर्भूत्वा पितृभि सह पच्यते ॥
आक्षेप्ता चानुमन्ता च तमेव नरकं व्रजेत् ।
भूमिदो भूमिहर्त्ता च नापर पुण्यपापयो ॥

भूमि य प्रतिगृह्णाति भूमि यश्च प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियत स्वर्गगामिनौ ॥
मद्यस्वे न रतिं कुर्य्यात्प्राणैः कण्ठगतैरपि ।
अनौषधमभैषज्य विषमेतद्धलाहलम् ॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिन हन्ति मह्मस्व पुत्त्रपौत्रकम् ॥
तेजसाग्निश्च दहति सूर्य्यो दहति रश्मिना ।
राजा दहति दण्डेन विप्रो दहति मन्युना ॥
यस्तड़ाग नवकुर्य्यात्पुराण वापि खानेयेत् ।
स सर्वकुलमुद्धृत्य स्वर्गलोके महीयते ॥
वापीकूपतड़ागानि उद्यानोपवनानि च ।
पुन संस्कारकर्त्ता च लभेत मौलिक फलम् ॥
उपस्थिते विवाहे च यज्ञे दाने च वासव ।
मोहाच्चरति विघ्न य स मृतो जायते क्रमि ॥
योवियाय कुलीनाय दरिद्राय च वासव ।
सन्तुष्टाय विनीताय सर्व्वभूतहिताय च ॥
वेदाभ्यासस्तपोज्ञानमिन्द्रियाणाञ्च संयम ।
ईदृशाय सुरश्रेष्ठ यद्दत्त हि तदक्षयम् ॥
धन फलति दानेन जीवितं जीवरक्षणात् ।
रूपमारोग्यमैश्वर्य्यमहिंसाफलमश्नुते ॥



अष्टमोल्लासः ।

ब्रह्मनिष्ठो गृहस्थः स्यात् ब्रह्मज्ञानपरायणः ।
यद्यत् कर्म्म प्रकुर्व्वीत तद्ब्रह्मणि समर्पयेत् ॥
न मिथ्याभाषणं कुर्य्यात् न च शाठ्यं समाचरेत् ।
देवतातिथिपूजासु गृहस्थो निरतो भवेत् ॥
मातरं पितरञ्चैव साक्षात् प्रत्यक्षदेवता ।
मत्वा गृही निषेवेत सदा सर्व्वप्रयत्नतः ॥
आसनं शयनं वस्त्रं पानभोजनमेव च ।
तत्तत् समयमाज्ञाय मात्रे पित्रे नियोजयेत् ॥
श्रावयेन्मृदुलां वाणीं सर्व्वदा प्रियमाचरेत् ।
पित्रोराज्ञानुसारी स्यात् सत्पुत्रः कुलपावनः ॥
औद्धत्यं परिहासञ्च तर्ज्जनं परिभाषणम् ।
पित्रोरग्रे न कुर्व्वीत यदीच्छेदात्मनो हितम् ॥
मातरं पितरं वीक्ष्य नत्वोत्तिष्ठेत् ससम्भ्रमः ।
विनाज्ञया नोपविशेत् संस्थितः पितृशासने ॥
विद्याधनमदोन्मत्तो यः कुर्य्यात् पितृहेलनम् ।
स याति नरकं घोरं सर्व्वधर्म्मबहिष्कृतः ॥

मातरं पितरं पुत्रं दारानतिथिसोदरान्।
हित्वा गृही न भुञ्जीयात् प्राणैः कण्ठगतैरपि॥
वञ्चयित्वा गुरून् बन्धून् यो भुङ्क्ते स्वोदरम्भरः।
इहैव लोके गर्ह्योऽसौ परत्र नारकी भवेत्॥
गृहस्थो गोपयेद्दारान् विद्यामभ्यासयेत् सुतान्।
पोषयेत् स्वजनान् बन्धूनेष धर्मः सनातनः॥
स धन्यः पुरुषो लोके स कृती परमार्थवित्।
ब्रह्मनिष्ठः सत्यसन्धो यो भवेद्भुवि मानवः॥
न भार्य्यान्ताडयेत् क्वापि मातृवत् पालयेत् सदा।
न त्यजेत् घोरकष्टेऽपि यदि साध्वी पतिव्रता॥
धनेन वाससा प्रेम्णा श्रद्धयामृतभाषणैः।
सततं तोषयेद्दारान् नाप्रियं क्वचिदाचरेत्॥
उत्सवे लोकयात्रायां तीर्थेष्वन्यनिकेतने।
न पत्नीं प्रेषयेत् प्राज्ञः पुत्रामात्यविवर्ज्जिताम्॥
यस्मिन्नरे महेशानि तुष्टा भार्य्या पतिव्रता।
सर्व्वो धर्म्मः कृतस्तेन भवतीप्रिय एव सः॥
चतुर्व्वर्षावधि सुतान् लालयेत् पालयेत् पिता।
ततः षोड़शपर्य्यन्तं गुणान् विद्याञ्च शिक्षयेत्॥
विंशत्यब्दाधिकान् पुत्रान् प्रेरयेद्गृहकर्म्मसु।
ततस्तांस्तुल्यभावेन मत्वा स्नेहं प्रदर्शयेत्॥

कन्याप्येवं पालनीया शिक्षणीयातियत्नतः ।
देया वराय विदुषे धनरत्नसमन्विता ॥
एवं क्रमेण भ्रातॄंश्च स्वस्य भ्रातृसुतानपि ।
ज्ञातीन् मित्राणि भृत्यांश्च पालयेच्चोपर्यहृष्टो ॥
ततः स्वधर्म्मनिरतानेकग्रामनिवासिनः ।
अभ्यागतानुदासीनान् गृहस्थः परिपालयेत् ॥
यद्येवं नाचरेद्देहि गृहस्थो विभवे सति ।
पशुरेव स विज्ञेयः स पापी लोकगर्हितः ॥
शौर्यं यश, पौरुषञ्च गुप्तये कथितञ्च यत् ।
कृतं यदुपकाराय धर्म्मज्ञो न प्रकाशयेत् ॥
जुगुप्सितमदृष्टो च लिखितेऽपि परालये ।
गुरुणा लघुना चापि यशस्वी न विवादयेत् ॥
विद्याधनयशोधर्म्मान् यतमान उपार्ज्जयेत् ।
व्यसनञ्चासतां सङ्गं मिथ्याद्रोहं परित्यजेत् ॥
अवस्थानुगता चेष्टा समयानुगता क्रिया ।
तस्मादवस्थां समयं वीक्ष्य कर्म्म समाचरेत् ॥
योगक्षेमरतो दक्षो धार्म्मिकः सुहृदान्वितः ।
मितवाङ्मितहासः स्वल्पस्वापो हि विज्ञवत् ॥
जितेन्द्रियः महात्मा सुखितः स्याद् नरः ।
समर्थो दीर्घदर्शी नानाकार्याणि विचारयेत् ॥